न्ति ॥ आजङ्घन्तिसाक्त्वेषाञ्जघनाः ॥ऽउपंजिग्घ्रते ॥ अश्श्वांजनि
प्प्रचेंतुसोश्श्वान्त्समत्त्सुंचोदय ॥ ५० ॥ अहिंरिवभोगैःपर्य्यैतिबाहु
ञ्ज्यायांहेतिम्पंरिबाधंमानः ॥ हस्तग्घ्नोव्विश्श्वाव्वयुनांनिव्विद्धान्पुमान्पु
मांत्सम्परिपातुव्विश्श्वतः ॥ ५१ ॥ व्वनंस्प्पतेव्वीड्वङ्गः ॥ व्वनंस्प्पतेव्वीड्व
ङ्गोहिभूयाऽअस्म्मत्त्सखाप्प्रतरंणःसुवीरः ॥ गोभिःसन्नंद्धोऽअसिव्वी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

डयंस्वास्त्थातातैंजयतुजेत्वांनि ॥ ५२ ॥ दिवःपृथिव्याः ॥ दिवः पृथिव्याःपर्य्योजउद्धृतंवनस्प्पतिभ्युःपर्य्याभृतुर्ठसहः ॥ अपामो ज्म्मानुम्पारिगोभिरावृता मिन्द्रस्यवज्ज्रंहविषारथंय्यज ॥ ५३ ॥ इ न्द्रस्यवज्ज्रः ॥ इन्द्रस्य वज्ज्रोमरुतामनीकंमित्रस्यगर्ब्भोवरुणस्य नाभिः ॥ सेमान्नोहव्यदातिञ्जुषाणोदेवरथप्प्रातिहव्यागृभाय ॥५४॥ उपश्श्वासय । पृथिवीमुतद्याम्पुरुत्रातेमनुतांविष्ठितञ्जगत् ॥ सदु न्दुभेसजूरिन्द्रेणदेवैर्दूराद्दवीयोऽअपसेधशत्रून् ॥ ५५ ॥ आक्रन्दय ॥ आक्रन्दयबलमोजोनऽआधानिष्टनिहिदुरिताबाधमानः ॥ अपप्प्रोथ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि.

॥२३५॥

दुन्दुभेदुच्छुनाऽइतऽइन्द्रंस्यमुष्टिरंसिवीडयस्व ॥५६॥ आमूऽ ॥ आ
मूरंजप्प्रुत्त्यावर्त्तयेमाकेतुमद्दुन्दुभिर्वावदीति ॥ समश्श्वंपर्णाश्चरं
न्तिनोनरोस्म्माकंमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्ग्नेयःकृष्णग्रीवं ।
वं । सारस्वतीमेषीबभ्रुःसौम्म्यःपौष्णणःश्यामःशितिपृष्ठोबार्हस्प
त्त्यः शिल्पोवैश्श्वदेवऽऐन्द्रोरुणोमारुतःकुल्म्माषऽऐन्द्राग्नःसं६ हि
तोधोरामःसावित्रोवारुणःकृष्णऽएकंशितिपात्त्पेत्त्वः ॥ ५८ ॥ अ
ग्ग्नयेनीकवते ॥ अग्ग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावित्रौ
पौष्णणौरजतनाभीवैश्श्वदेवौ पिशङ्गौतूपरौमारुतःकुल्म्माषऽआग्ने

उ.अ.

२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यꣳकृष्णोजꣳसारस्वतीमेषीर्व्वारुणꣳपेत्त्वः ॥ ५९ ॥ अग्नयेगायत्रा
यं । त्रिवृतेराथन्तरायाष्टाकपालऽइन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायै
कादशकपालोव्विश्वेभ्योदेवेभ्योजागतेभ्यः सप्तदशेभ्योवैरूपे
भ्योद्वादशकपालोमित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां
वैराजाभ्याम्पयस्याबृहस्पतयेपाङ्क्तायत्रिणवाय शाक्वरायचरुꣳसवित्र
ऽऔष्णिहायत्रयस्त्रिꣳशायरैवतायद्वादशकपालꣳप्राजापत्त्यश्चरुर
दित्यैव्विष्णुपत्न्यैचरुरग्नयेवैश्वानराय द्वादशकपालोनुमत्याऽ
अष्टाकपालꣳ ॥६०॥ [२४]॥४॥इति श्रीशुक्लयजुःसंहितापाठे एकोन

त्रिंशोऽध्यायः॥ २९ ॥ देवसवितःषट्तपसेकौलालꣳषोडशद्वौद्वाविꣳ
शतिः॥ॐ देवंसवितः॥देवंसवितुःप्प्रसुंवयुज्ञम्प्रसुंवयुज्ञपंतिम्भगाय॥
दिव्योगंन्धुर्व्वःकेतुपूःकेतंन्नःपुनातुव्वाचस्प्पतिर्व्वाचंन्नःस्वदतु ॥ १ ॥ त
त्संवितुः ॥ तत्संवितुर्व्वरेण्यम्भर्गोदेवस्यंधीमहि ॥ धियोयोनंःप्प्र
चोदयात् ॥ २ ॥ व्विश्वानिदेव । सवितर्दुरितानिपरासुव ॥ यद्भुद्रन्त
न्नऽआसुव ॥३॥ व्विभुक्तारꣳहवामहे ॥ व्विभुक्तारꣳहवामहेव्वसोश्चित्र
स्यराधसः ॥ सवितारंन्नृचक्षसम् ॥ ४ ॥ ब्रह्मणेब्राह्मणम् ॥ ब्र
ह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योव्वैश्यन्तपसेशूद्रन्तमसे ।तस्क

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रन्नारुकार्यंवीरुहणंम्पाप्मनेंक्लीबमांक्कुयायांऽअयोगूक्कामांयपुंश्चूलूम
तिंक्कुष्टायमागधम् ॥ ५ ॥ नृत्तायंसूतम् ॥ नृत्तायंसूतङ्गीतायंशैलू
षन्धम्मांयसभाचरन्नुरिष्ठांयैभीमुलन्नुम्मांयंरेभर्ꣳहसांय कारिंमानु
न्दायंस्त्रीषुखम्प्रमदेंकुमारीपुत्रम्मेधायैरथकारन्धैर्य्यांयुतक्षांणम् ॥
॥ ६ ॥ [६ ॥ तपंसेकौलालम् ॥ तपंसेकौलालम्मायायैंकुम्मांरꣳरू
पायंमणिकारꣳशुभेवुपꣳशंरुव्यायाऽइषुकारꣳहेत्त्यै धंनुष्कारङ्कम्मंणे
ज्याकारान्दिष्टायंरज्जुसर्जम्मृत्त्यवेंमृगयुमन्तंकायश्श्वनिनंम् ॥ ७ ॥
नदीभ्यंःपौञ्जिष्ठम् ॥ नदीभ्यंःपौञ्जिष्ठमृक्षीकांभ्योनैषांदम्पुरुष

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 व्याघ्रायंदुर्म्मदङ्गन्धर्व्वाप्सरोभ्योव्व्रात्त्यम्प्रयुग्भ्यऽउन्मत्तꣳ सर्प्पदे
 वजनेभ्योऽप्रतिपदमयेभ्यः कितवमीर्य्यतायाऽअकितवम्पिशाचे
भ्योबिदलकारीम्यातुधानेभ्यःकण्टकीकारीम् ॥ ८ ॥ सन्धयेजा
रम् ॥ सन्धयेजारङ्गेहायोपपतिमार्त्त्यैपरिवित्तन्निर्ऋत्यैपरिविविदान
मराद्ध्याऽएदिधिषुःपतिन्निष्कृत्त्यैपेशस्कारीꣳसञ्ज्ञानाय स्स्मरका
रीम्प्रकामोद्यायोपसदंवर्णायानुरुधम्बलायोपदाम् ॥ ९ ॥ उत्त्सादे
 भ्यः कुब्जम् ॥ उत्त्सादेभ्यः कुब्जम्प्रमुदेवामनन्द्द्वाभ्यःस्त्रामꣳस्व
 प्नायान्धमधर्म्मायबधिरम्पवित्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षायैंप्प्रश्निनंमुपशिक्षायांऽअभिप्प्रश्निनंम्मर्य्यादायैप्प्रश्नविवाक
म् ॥ १० ॥ अर्म्मैभ्यो हस्तिपम् ॥ अर्म्मैभ्यो हस्तिपञ्जवायाश्श्व
पम्पुष्ट्यैगोपालंव्वीर्य्यायाविपालन्तेजसेजपालमिरायैकीनाशंङ्कीला
लायसुराकारम्भद्रायगृहपᳪंश्श्रेयसेवित्तधमाद्ध्यक्ष्यायानुक्षत्तारम्
॥ ११ ॥ भायैदार्व्वाहारम् ॥ भायैदार्व्वाहारम्प्रभायाऽअग्न्येधम्ब्रध्न
स्यंव्विष्टपायाभिषेक्तारंव्वर्षिष्ठायनाकायपरिवेष्टारंन्देवलोकायपेशिता
रम्मनुष्यलोकायप्प्रकरितारᳪंसर्व्वेभ्योलोकेभ्यऽउपसेक्तारमवऽ
ऋत्यैव्वधायोपमन्थितारम्मेधायव्वासःपल्पूलीम्प्रकामायरजयित्री

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. मू ॥ १२ ॥ ऋतयैस्तेनह्दंदयम् ॥ ऋतयैस्तेनह्दंदयुंव्वैरंहत्यायुपिशु
॥२३८॥ नंव्विविंक्तयैक्षुत्तारुमौपंद्रष्ट्यायानुक्षुत्तारुम्बलांयानुचुरम्भूम्नेपरिष्कु
न्दम्प्रियायंप्प्रियवुादिनुमरिष्ट्याऽअश्वसुादंᳫस्वुग्गायंलुोकायंभा
गदुघंव्वर्षिष्ठायुनाकांयपरिवुेष्टारंम् ॥ १३ ॥ मुन्न्यवेयस्तुापम् ॥ मु
न्न्यवेयस्तुापङ्क्रोधांयनिसुरँठ्योगांययोक्तारुᳫशोकांयाभिसुर्त्तारुङ्क्षेमां
यव्विमोक्तारंमुत्त्कूलनिकूलेब्भ्यांस्त्रिष्ठिनंव्वपुषेमानस्कृतᳫशीलांयाञ्ज
नीकुारीन्निर्ऋृत्यैकोशकुारींय्युमायायुासूम् ॥ १४ ॥ युमायंयमुसूम् ॥
उ.अ. युमायंयमुसूमथर्व्वुब्भ्योवंतोकाᳫसंव्वत्सुरायंपर्य्यायिणीम्परिवत्त्सरा
३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याविंजातामिदावत्त्सरायातीत्त्वंरीमिद्वत्त्सरायांतिष्क्कद्वंरींव्वत्त्सराय
व्विजर्ज्जंराꣳसव्वत्त्सरायपलिक्क्नीमृभुभ्योऽजिनसन्धꣳसाद्ध्येभ्यं
श्चर्म्मम्म्नम् ॥ १५ ॥ सरोभ्योधैवरम् ॥ सरोभ्योधैवरमुपस्त्था
वंराभ्योदाशंव्वैशन्ताभ्योबैन्दन्नड्वलाभ्यःशौष्क्कंलम्पारायंमार्ग्गार
मंवारायकैवर्त्तन्तीर्थेभ्यऽआन्दंव्विषमेभ्योमैनालꣳस्वनेभ्यःपर्ण्ण
कङ्गुहाभ्यःकिरातꣳसानुभ्योजम्भकम्पर्व्वतेभ्यःकिम्पूरुषम् ॥
॥ १६ ॥ बीभत्सायैपौल्कसम् ॥ बीभत्सायैपौल्कसंव्वर्णायहिरण्य
कारन्तुलायैव्वाणिजम्पश्चादोषायंग्लाविनंव्विश्वेभ्योभूतेभ्यः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. सिध्मुलम्भूत्यैंजागरुणमभूंत्यैस्वपुनमार्त्यैजंनवादिनुंव्यृद्ध्याऽअप
॥२३९॥ गुल्भंसंशुरायंप्प्रुच्छिदम् ॥ १७ ॥ अक्षुराजायंकितुवम् ॥
अक्षुराजायंकितुवङ्कृतायांदिनवदुर्शन्त्रेतायैकुल्प्पिनन्द्वापरायाधिकु
ल्प्पिनंमास्कुन्दायंसभास्त्थाणुम्मृत्यवेंगोव्युच्छमन्तंकायगोघात्त
क्षुधेयोगांव्विकृन्तन्तुम्भिक्षंमाणऽउपुतिष्ठंतिदुष्कृतायुचरंकाचार्य्यं
म्पाप्मनेंसैलुगम् ॥ १८ ॥ प्रतिश्श्रुत्त्कायाऽअर्त्तुनम् ॥ प्रतिश्श्रु
उ.अ. त्त्कायाऽअर्त्तुनङ्घोषांयभुषमन्तांयबहुवादिनंमनुन्तायुमूकुंशब्ब्दांया
३० डम्बराघातम्महंसेव्वीणावादङ्क्रोशांयतूणवुध्ध्मर्मवरस्पुरायंशङ्खुध्ध्मं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्वनांयव्वनुपमुन्न्यतौरण्यायदावुपम् ॥१९॥नुर्म्मायपुँश्श्चुलूम् ॥ नुर्म्मा
यपुँश्श्चुलूꣳहसायुकारिꣳय्यादसेशाबुल्ल्याङ्ग्रामुण्ण्यङ्गणकमभिक्क्रोशंकु
न्तान्न्महसेव्वीणावुादम्पाणिग्घ्नन्तूणवुध्ध्मन्तान्नृत्तायानुन्दायंतलुवम्
॥ २० ॥ अुग्ग्नयेपीवानम् ॥ अुग्ग्नयेपीवानम्पृथिव्व्यैपीठसुर्प्पिणंव्वाय
वेंचाण्डालमुन्तरिक्षायव्वꣳशनुर्त्तिनन्दिवेखंलुतिꣳ सूर्य्यायहर्य्युक्षन्नक्ष
त्रेब्भ्यꣳकिर्म्मिरञ्चुन्द्रमंसेकिलासुमन्न्हेशुक्लम्पिङ्गाक्षꣳरात्र्यैकृष्णण
म्पिङ्गाक्षम् ॥ २१ ॥ अथैतान् ॥ अथैतानुष्टौव्विरूपानालंभुतेति
दीर्ग्घुञ्चातिह्रस्वुञ्चातिस्त्थूलुञ्चातिकृशुञ्चातिशुक्लुञ्चातिकृष्णुञ्चाति

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुल्वश्चातिलोमशश्च ॥ अशूद्राऽअब्राह्मणास्तेप्राजापत्त्याः ॥ मा

गधःपुँश्चलीकितवःक्लीबोशूद्राऽअब्राह्मणास्तेप्राजापत्त्याः ॥ २२ ॥
[१६] इति श्रीशुक्लयजुस्संहितापाठे त्रिंशत्तमोऽध्यायः ॥ ३० ॥
सहस्रशीर्षाषोडशाद्यः संभृतःषट्द्वौद्वाविंशतिः॥ ॐसुहस्रशीर्षापुरु
षः । सहस्राक्षःसुहस्रपात् ॥ सभूमिंर्ठसुर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गु
लम् ॥१॥ पुरुषऽएव ॥ पुरुषऽएवेदर्ठसर्व्वुंय्यद्भूतंय्यच्चभाव्यम् ॥ उ
उ.अ तामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्य । महिमा

तोज्ज्यायाँश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वि ॥ ३॥ त्रिपादूर्द्ध्वः ॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषुःपादोस्येहाभवत्पुनः॥
ततोव्विष्वुङ्व्यक्रामत्साशनानशुनेऽअभि ॥४॥ ततोव्विराट् ॥ ततो
व्विराडजायतव्विराजोऽअधिपूरुषः॥ सजातोऽअत्त्यरिच्च्यतपश्चाद्भूमि
मथोपुरः॥ ५ ॥ तस्माद्यज्ञात् ॥ तस्माद्यज्ञात्सर्व्वहुतुःसम्भृतम्पृष
दाज्ज्यम् ॥ पशूँस्ताँश्चक्रेव्वायुव्यानारण्याग्ग्राम्म्याश्चये ॥६॥ त
स्म्माद्यज्ञात् ॥ तस्म्माद्यज्ञात्सर्व्वहुतुऽऋचुःसामानिजज्ञिरे ॥ छन्दा
ॱसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥ तस्म्मादश्वाः॥
तस्म्मादश्वाऽअजायन्तुयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्म्मा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. तस्म्मा॑ज्जा॒ता ऽअ॑जा॒वय॑ः ॥ ८ ॥ तं॑ य॒ज्ञम् ॥ तं य॒ज्ञम्ब॒र्हिषि॒ प्प्रौक्ष॒
न्पुरु॑षञ्जा॒तम॑ग्ग्र॒तः ॥ तेन॑ दे॒वा ऽअ॑यजन्त सा॒द्ध्या ऽऋष॑यश्च॒ ये ॥ ९ ॥
॥२४१॥ यत्पुरु॑षम् ॥ यत्पुरु॑षं॒ व्यद॑धुः कति॒धा व्य॑कल्प्पयन् ॥ मुखं॒ किम॑
स्यासी॒त्किम्बा॒हू किमू॒रू पादा॑ ऽउच्च्येते ॥ १० ॥ ब्राह्म॒णो॑ऽस्य ॥ ब्रा
ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्य॑ः कृ॒तः ॥ ऊ॒रू तद॑स्य॒ यद्वैश्य॑ः प॒द्भ्या
ꣳ शू॒द्द्रो ऽअ॑जायत ॥ ११ ॥ च॒न्द्रमा॒ मन॑सः ॥ च॒न्द्रमा॒ मन॑सो जा॒त
उ.अ. श्चक्षो॒ः सूर्य्यो॑ ऽअजायत ॥ श्रोत्त्रा॑द्वा॒युश्च॑ प्प्रा॒णश्च॒ मुखा॑द॒ग्निर॑जाय
३१ त ॥ १२ ॥ नाभ्या॑ ऽआसीत् ॥ नाभ्या॑ ऽआसीद॒न्तरि॑क्षꣳ शी॒र्ष्णो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्यौःसमवर्त्तत ॥ पद्भ्यांभूमिर्द्दिशःश्रोत्रात्तथालोकाँऽअकल्पयन्
॥१३॥ यत्पुरुषेण । हविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदा
ज्ज्यंग्ग्रीष्मऽइध्मःशरद्धविः ॥१४॥ सप्तास्स्यासन् ॥ सप्तास्स्यास
न्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्नन्पु
रुषम्पशुम् ॥१५॥ यज्ञेनयज्ञम् ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्मा
णिप्प्रथमान्न्यासन् ॥ तेहनाकम्महिमानःसचन्तयत्रपूर्वेसाद्ध्याःस
न्तिदेवाः ॥ १६ ॥ [१६] अद्भ्यःसम्भृतः । पृथिव्यैरसाच्चविश्वकर्म्म
णःसमवर्त्तताग्ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्त्यस्यदेवत्त्व

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मा॒जानु॑मग्रे॑ ॥१७॥ वे॒दा॒हम् ॥ वे॒दा॒हमे॒तम्पुरु॑षम्म॒हान्तं॑मादि॒त्त्यव॑
र्णन्तम॑सः॒पुरस्त्ता॑त् ॥ तमे॒ववि॑दि॒त्त्वाति॑मृ॒त्त्युमे॑तिनान्न्यः॒पन्था॑विद्य
तेय॑नाय ॥१८॥ प्र॒जाप॑ति॒श्च्चरा॑ति ॥ प्र॒जाप॑ति॒श्च्चरतिग॒र्ब्भेऽअ॒न्तरजा॑
यमानोबहु॒धाविजा॑यते ॥ तस्य॒योनि॒म्परि॑पश्श्यन्ति॒धीरा॒स्तस्मि॑म्मह
तस्त्थु॒र्ब्भुव॑नानि॒विश्श्वा॑ ॥१९॥ योदे॒वेब्भ्य॑ः ॥ योदे॒वेब्भ्य॒ऽआतप॑ति
योदे॒वाना॑म्पु॒रोहि॑तः ॥ पूर्व्वोयोदे॒वेब्भ्योजा॒तोनमो॑रुचाय॒ब्राह्मये ॥
॥२०॥रु॒चम्ब्रा॒ह्मम॒म्॥रु॒चम्ब्रा॒ह्मज्ज॒नय॑न्तोदे॒वाऽअग्ग्रे॒तद॑ब्रुवन् ॥ य
स्त्त्वै॒वम्ब्रा॑ह्मणो॒विद्यात्तस्य॑दे॒वाऽअ॑स॒न्वशे॑ ॥ २१ ॥ श्रीश्च ॥ श्रीश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेलुक्ष्मीश्च्चुपत्त्क्न्यांवहोरात्रेपार्श्वेनक्षत्राणिरूपमुश्विनौव्यात्तंम् ॥
इष्णन्निषाणामुम्मं॑ऽइषाणसर्व्वलोकम्मं॑ऽइषाण ॥ २२ ॥ [६] ॥२॥
इति श्रीशुक्लयजुःसंहितायां एकत्रिंशोऽध्यायः ॥ ३१ ॥ तदेवसप्तवेन
स्तन्नवद्धौषोडश ॥ ॐतदेव ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदुंचन्द्र
माः ॥ तदेवशुक्रन्तद्ब्रह्मताऽआपुःसप्रजापतिः ॥ १ ॥ सर्वेनिमे
षाः ॥ सर्वेनिमेषाजज्ञिरेविद्युतःपुरुषादधि ॥ नैनमूर्ध्वन्नतिर्य्यञ्चन्नम
ध्येपरिजग्रभत् ॥ २ ॥ नतस्यं । प्रतिमाऽअस्तियस्युनानामंमु
हद्यशः ॥ हिरण्यगर्भऽइत्येषमामाहिंसीदित्येषायस्मान्नजातऽइ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. त्येषः ॥ ३ ॥ एषोहं ॥ देवःप्प्रदिशोनुसर्व्वाःपूर्व्वोहजातःसऽउगर्ब्भेऽ
॥२४३॥ अन्तः ॥ सऽएवजातःसजंनिष्यमाणःप्प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखः
॥ ४ ॥ यस्म्माञ्जातम् ॥ यस्म्माञ्जातन्नपुराकिञ्चनैवयऽआबभूवभु
वनानिविश्श्वा ॥ प्प्रजापतिःप्प्रजयासꣳरराणस्त्त्रीणिज्ज्योतीꣳषिसच
तेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्ग्रापृथिवीचदृढायेनस्वस्त
भितंय्येननाकः ॥ योऽअन्तरिक्षेरजसोविमानःकस्मैदेवायहविषावि
उ.अ. धेम ॥ ६ ॥ यङ्क्रन्दसी ॥ यङ्क्रन्दसीऽअवसातस्तभानेऽअभ्यैक्षेताम्मन
३२ नसारेजमाने ॥ यत्राधिसूरऽउदितोविभातिकस्मैदेवायहविषाविधे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. त्वमानमभिसंविवेश ॥ ११ ॥ परिद्यावापृथिवी । सद्यऽइत्त्वापरि
॥२४४॥ लोकान्परिदिशःपरिस्वः ॥ ऋतस्यतन्तुंविततंविचृत्त्यतदपश्यत्त
दभवत्तदासीत् ॥ १२ ॥ सदसस्पतिम् ॥ सदसस्पतिमद्भुतम्प्रिय
मिन्द्रस्यकाम्म्यम् ॥ सनिम्मेधामयासिषꣳस्वाहा ॥ १३ ॥ याम्मे
धाम् ॥ याम्मेधान्देवगणाःपितरश्चोपासते ॥ तयामामद्यमेधयाग्ने
मेधाविनङ्कुरुस्वाहा ॥ १४ ॥ मेधाम्मे ॥ मेधाम्मेवरुणोददातुमेधा
३.अ. मग्निःप्रजापतिः ॥ मेधामिन्द्रश्चवायुश्चमेधान्धाताददातुमेस्वा
३२ हा ॥ १५ ॥ इदम्मे ॥ इदम्मेब्रह्मचक्षत्रञ्चोभेश्रियमश्नुताम् ॥

म ॥ आपोहयद्बृहतीर्य्यश्चिदापः ॥७॥ [७] वेनस्तत् ॥ वेनस्त
त्पश्यन्निहितङ्गुहासद्यत्रविश्वम्भवत्येकनीडम् ॥ तस्मिन्निदꣳसञ्च
विचैतिसर्व्वꣳसऽओतंऽप्प्रोतश्चविभूंऽप्प्रजासु ॥ ८ ॥ प्रतत् ॥ प्रतद्वो
चेदमृतन्नुविद्वान्गन्धर्व्वोधामविभृतङ्गुहासत् ॥ त्रीणिपदानिनिहितागु
हास्ययस्तानिवेदसपितुःपितासत् ॥९॥ सनः ॥ सनोबन्धुर्ज्जनिता
सविधाताधामानिवेदभुवनानिविश्वा ॥ यत्रदेवाऽअमृतमानशानास्तृ
तीयेधामन्नध्यैरयन्त ॥ १० ॥ परीत्यभूतानि । परीत्यलोकान्परी
त्यसर्व्वाःप्प्रदिशोदिशश्च ॥ उपस्थायप्प्रथमजामृतस्यात्मना

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मयिदेवादधतुश्श्रियमुत्तमुन्तस्स्यैतुस्वाहा ॥ १६ ॥ [९] ॥ २ ॥
इति श्रीशुक्लयजुःसंहितायां द्वात्रिंशोऽध्यायः ॥३२॥ अस्याजरासः
सप्तदशापश्चिद्द्वादशविभ्राट्चतुर्द्दशप्रवावृजएकादशप्रवायुंप्रवीरया
पंचदशकावानस्त्रयोदशसप्तसप्तनवातिः ॥ ॐअस्स्याजरासः ॥ अ
स्स्याजरासोदमामरित्राऽअर्चद्धूमासोऽअग्नयःपावकाः ॥ श्वितीचयःश्वात्रासोभुरण्यवोवनर्षदोवायवोनसोमाः ॥ १ ॥ हरयोधूम
केतवः ॥ हरयोधूमकेतवोवातजूताऽउपद्यवि ॥ यतन्तेवृथगग्नयः ॥
॥ २ ॥ यजानः ॥ यजानोमित्रावरुणायजादेवाँऽऋतम्बृहत ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्नेयक्षिस्स्वन्दंमम् ॥ ३ ॥ युक्ष्वाहि । देवहूतमाँ॥ऽअश्वाँ॥ऽ
अग्नेरथीरिव ॥ निहोतापूर्व्यःसंदः ॥ ४ ॥ द्वेविरूपे । चरतः
स्वर्थेऽअन्यान्यावत्समुपधापयेते ॥ हरिरन्यस्याम्भवतिस्वधावा
ञ्छुक्रोऽअन्यस्यान्ददृशेसुवर्च्चाः ॥५॥ शतम् १७०० ॥ अयमिह ।
प्रथमोधायिधातृभिर्होतायजिष्ठोऽअध्वरेष्वीड्यः ॥ यमप्नवानोभृ
गवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे ॥ ६ ॥ त्रीणिशता । त्रीसह
स्राण्यग्निन्त्रिँ॥शच्चदेवानवचासपर्यन् ॥ औक्षन्घृतैरस्तृणन्बर्हिर
स्माऽआदिद्धोतारन्न्यसादयन्त ॥७॥ मूर्द्धानन्दिवः ॥ मूर्द्धानन्दि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥ कविर्ठ्सम्म्रा
जमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥ अग्निर्वृत्राणि ।
जङ्घनद्द्रविणस्युर्व्विपन्यया ॥ समिद्धःशुक्रऽआहुतः ॥ ९ ॥ व्विश्वेभिः
सोम्म्यम् ॥ व्विश्वेभिःसोम्म्यम्मद्ध्वग्नऽइन्द्रेणव्वायुना ॥ पिबामित्र
स्यधामभिः ॥ १० ॥ आयत् ॥ आयदिषेनृपतिन्तेजऽआनट्शुचिरे
तोनिषिक्तन्द्यौरभीके ॥ अग्निःशर्द्धमनवद्यंय्युवानठ्स्वाद्ध्यञ्जनय
त्त्सूदयञ्च ॥ ११ ॥ अग्नेशर्द्ध । महतेसौभगायतवद्द्युम्न्नान्युत्तमा
निसन्तु ॥ सञ्जास्पत्यर्ठ्सुयममाकृणुष्ष्वशत्रूयतामभितिष्ठामहा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 ꣳसि ॥ १२ ॥ त्वाꣳहि । मुन्द्रतममर्क्कशोकैर्व्ववृमहेमहिनꣳश्रोष्ष्य
 ग्ग्ने ॥ इन्द्रन्नत्त्वाशवंसादेवतांव्वायुम्पृणन्तिराधंसानृत्तमाꣳ ॥ १३ ॥
त्वेऽअग्ग्ने । स्वाहुतप्प्रियासꣳसन्तुसूरयः ॥ यन्तारोयेमघवानोज
नानामूर्व्वान्दयन्तगोनाम् ॥ १४ ॥ श्रुधिश्श्रुत्त्कर्ण्ण ॥ श्रुधिश्श्रुत्त्क
र्ण्णव्वह्निभिर्देवैरग्ग्नेसयावभिः ॥ आसीदन्तुबर्हिषिमित्रोऽअर्य्यमा
प्रातर्य्यावाणोऽअद्ध्वरम् ॥ १५ ॥ व्विश्श्वेषामदितिः ॥ व्विश्श्वेषाम
 दितिर्य्यज्ञियानांव्विश्श्वेषामतिथिर्म्मानुषाणाम् ॥ अग्निर्द्देवानामव
 ऽआवृणानꣳसुमृडीकोभवतुजातवेदाः ॥ १६ ॥ महोऽअग्ग्नेः । समि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धानस्यशर्म्मण्यनांगामित्रेवरुणेस्वस्तयें ॥ श्रेष्ठंस्यामसवितुःसवीम
नितद्देवानामवोऽअद्याबृणीमहे ॥ १७ ॥ [१७] आपंश्चित् ॥ आ
पंश्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतंजरितारंस्तऽइन्द्र ॥ याहिवायुर्न
नियुतोंनोऽअच्छात्वंहिधीभिर्दयंसेविवाजान् ॥१८॥ गावऽउप ॥
गावऽउपांवतावतम्महीयज्ञस्यंरप्सुदां ॥ उभाकर्णाहिरण्ययां ॥
॥१९॥ यदद्य । सूरऽउदितेनांगामित्रोऽअंर्यमा ॥ सुवातिसविता
भगः ॥ २० ॥ आसुतेसिंचतश्रियंरोदंस्योरभिश्रियंम् ॥ रसा
दंधीतवृषभम् ॥ तम्प्रत्नथायंवेनः ॥ २१ ॥ आतिष्ठन्तम्परि ॥ आ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. तिष्ठंन्तुम्पारािविश्वेंऽअभूषुञ्छ्रयोविसांनश्चरातिस्वरोंचिः ॥ मुहत्त
॥२४७॥ हूष्णोऽअसुंरस्युनामांविुश्वरूपोऽअुमृतांनितुस्त्थौ ॥ २२ ॥ प्र
वंः ॥ प्रवोंमुहेमन्दंमानुायान्धुसोर्चांविुश्वानंरायाविश्वाभुवें ॥ इ
न्द्रस्युयस्युसुमखुंसहोमहिुश्रवोंनृम्णञ्चरोदंसीसपुर्य्यतंः ॥२३॥
बृहन्नित् ॥ बृहन्निदिुध्मऽएंषाम्भूरिंशुस्तम्पृथुस्वरुंः ॥ येषामि
न्द्रोयुवासखां ॥ २४ ॥ इन्द्रेंहि ॥ इन्द्रेंहिुमत्स्यन्धंसुोविश्वे
उ.अ. भिःसोमुपर्वंभिः ॥ मुहाँऽअंभिुष्टिरोजंसा ॥ २५ ॥ इन्द्रोंवृत्रम् ॥
३२ इन्द्रोंवृत्रमंवृणोच्छर्द्धंनीतिुःप्रमायिनांममिनाद्वर्पंणीतिः ॥ अहन्व्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽसमुशधुग्गवनैष्ष्वाविद्धैनांऽअकृणोद्द्याम्म्याणाम् ॥ २६ ॥ कुत
स्त्वम् ॥ कुतस्त्वमिन्द्रमाहिनुःसन्नेकोयासिसत्पतेकिन्तंऽइत्त्थास
म्पृच्छसेसमराणःशुभानैर्व्वोचेस्तन्नोहरिवोयत्तेऽअस्स्मे ॥ मुहाः
ऽइन्द्रोयऽओजसाकदाचनस्तरीरसिकदाचनप्प्रयुच्छसि ॥२७॥ आ
तत्तेऽइन्द्रायवःपनन्ताभियऽऊर्व्वङ्गोमन्तन्तितृत्सान् ॥ सुकृत्स्वंय्ये
पुरुपुत्राम्महीथंसहस्रधाराम्बृहतीन्दुदुक्षन् ॥२८॥ इमान्ते ॥ इमा
न्तेधियम्प्रभरेमहोमहीमस्यस्तोत्त्रेधिषणायत्तेऽआनजे ॥ तमुत्सवे
चप्प्रसवेचसासहिमिन्द्रन्देवासःशवसामदन्ननु ॥ २९ ॥ [१२] द्वि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 ऽभ्राड्बृहत् ॥ विभ्राड्बृहत्पिबतुसोम्यम्मद्ध्वायुर्दधंद्यज्ञपंताववि॑हुत
 म् ॥ वातंजूतोयोऽअंभिरक्षतित्त्मनांप्रजाःपुंपोषपुरुधाविराजति ॥
॥ ३० ॥ उदुत्त्यम् ॥ उदुत्त्यञ्जातवेंदसन्देवंवंहन्तिकेतवं÷ ॥ दृशेवि
श्वांयुसूर्य्यम् ॥ ३१ ॥ येनांपावक ॥ येनांपावकुचक्षंसाभुरण्यन्त
ञ्जनाँ२अनु ॥ त्त्वंवंरुणपश्यंसि ॥ ३२ ॥ दैव्यावद्ध्वर्य्यूऽअगंतुर्ठ्रथे
नुसूर्य्यंत्त्वचा ॥ मद्ध्वांयुज्ञ्ठसमंञ्जाथे ॥ तम्प्रुत्नथायंवेनश्चित्रन्देवा
 नांम् ॥ ३३ ॥ आन÷ ॥ आनुऽइडांभिर्व्विदथेंसुशुस्तिविश्वानरःसवि
 तादेवऽएंतु ॥ अपियथांयुवानोमत्त्संथानोविश्श्वुञ्जगंदाभिपित्त्वेमंनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षा ॥ ३४ ॥ यदद्य ॥ कच्चंवृत्रहन्नदगाऽअभिसूंर्य्यं ॥ सर्व्वुन्तदिंन्द्रते
व्वशें ॥ ३५ ॥ तरणिर्व्विश्वदंर्शतः ॥ तरणिर्व्विश्वदंर्शतोज्ज्योतिष्कृदं
सिसूर्य्य ॥ व्विश्वमाभांसिरोचनम् ॥ ३६ ॥ तत्सूर्य्यंस्य । देवत्वन्त
न्मंहित्वम्मुद्ध्याकर्त्तोर्व्वितंत१ँसञ्जंभार ॥ यदेदयुंक्तहरित॑ःसधस्त्था
दाद्रात्त्रीवासंस्तनुतेसिमस्म्मैं॥३७॥ तन्मित्रस्यं ॥ तन्मित्रस्यव्वरुंण
स्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थें ॥ अनन्तमन्न्यद्रुशंदस्यपाजंः
कृष्णमन्न्यद्धरितःसम्भंरन्ति ॥३८॥ बण्महान् ॥ बण्महा२आंसि
सूर्य्यबडांदित्यमहाऽआंसि ॥ महस्तैंसतोमंहिमापंनस्यतेद्धादेंव

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

मुहाँ२ऽअंसि ॥ ३९ ॥ बट्सूर्ष्य श्रवंसामुहाँ२ऽअंसिसुत्रादेवमुहाँ२ऽअं
सि ॥ मुन्हादेवानामसुर्ष्य पुरोहितोविभुज्ज्योतिरदाभ्यम् ॥४०॥
श्रायन्तऽइवसूर्ष्यम् ॥ श्रायन्तऽइवसूर्ष्यविश्वेदिन्द्रस्यभक्षत ॥ वसू
निजातेजनमानुऽओजसाप्प्रतिभागन्नदीधिम ॥ ४१ ॥ अद्यादेवाः॥
अद्यादेवाऽउदितासूर्ष्यस्यनिरहंसःपिपृतानिरवद्यात् ॥ तन्नोमित्रो
वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः ॥ ४२ ॥ आकृ
ष्णेन ॥ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हि
रण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४३ ॥ [१४] प्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वांवृजे ॥ सुप्प्रयाबर्हिरेषामाविश्पतीवुवीरिटऽइयाते ॥ व्विशामुक्क्षो
रुषसः पूर्वहूतौव्वायुः पूषास्वुस्तयेनियुत्त्वान् ॥ ४४ ॥ इन्द्रवायूबृह
स्पतिम् ॥ इन्द्रवायूबृहस्पतिम्मित्राग्निम्पूषणम्भगम् ॥ आदित्त्या
न्मारुतङ्गणम् ॥ ४५ ॥ व्वरुणः प्राविता । भुवन्मित्रोव्विश्वाभिरू
तिभिः ॥ करतान्नः सुराधसः ॥ ४६ ॥ अधिनः ॥ अधिनऽइन्द्रैषाँव्वि
ष्णोसजात्त्यानाम् ॥ इतामरुतोऽअश्विना ॥ तम्प्रत्क्कथायंव्वोनाये
देवासऽआनऽइडाभिर्व्विश्वेभिः सोम्म्यम्मद्धोमांसश्चर्षणीधृतः ॥ ४७ ॥
अग्नऽइन्द्र । व्वरुणमित्रदेवाः शर्द्धः प्प्रयन्तुमारुतोतव्विष्णो ॥ उभा

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

नासंत्त्यारुद्द्रोऽअधुग्ग्नाःपूषाभगःसरस्वतीजुषन्त ॥ ४८ ॥ इन्द्राग्ग्नी
मित्त्रावरुणा । दितिछुंस्वः पृथिवीन्द्यामम्मरुतःपर्व्वताँ२ऽअपः ॥ हुवे
व्विष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशछंसछंसवितारमूतये ॥ ४९ ॥
अस्म्मेरुद्द्राः ॥ अस्म्मेरुद्द्रामेहनापर्व्वतासोवृत्त्रहत्त्येभरहूतौसजोषाः ॥
यःशछंसतेस्तुवतेधायिपज्ज्रऽइन्द्रज्ज्येष्ठाऽअस्म्माँ२ऽअवन्तुदेवाः ॥
॥ ५० ॥ अर्व्वाञ्च्चोऽअद्द्य ॥ अर्व्वाञ्च्चोऽअद्द्याभवतायजत्राऽआवो
हार्द्दिभयमानोव्व्ययेयम् ॥ त्त्राद्ध्वन्नोदेवानिजुरोव्वृकस्ययुत्त्राद्ध्वङ्कर्त्तादवप
दोयजत्राः ॥ ५१ ॥ व्विश्श्वेऽअद्द्य । मरुतोव्विश्श्वऽऊतीव्विश्श्वेभवन्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्नयुऽसमिद्धाः ॥ व्विश्वेनोदेवाऽअवुसागमन्तुव्विश्वमस्तुद्रविणं
व्वाजोऽअस्मे ॥ ५२ ॥ व्विश्वेदेवाः । शृणुतेमꣳहवम्मेयेऽअन्तरि
क्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन्बर्हि
षिमादयद्ध्वम् ॥ ५३ ॥ देवेभ्योहि । प्प्रथमंय्यज्ञियेभ्योमृतत्व
ꣳसुवसिभागमुत्तमम् ॥ आदिद्दामानꣳसवितुर्व्यूर्णुषेनूचीनाजीवि
तामानुषेभ्यः ॥ ५४ ॥ [११] प्रवायुम् ॥ प्रवायमच्छाबृहतीमं
नीषाबृहद्रयिंव्विश्ववारꣳरथप्प्राम् ॥ द्युतद्यामानियुतःपत्यमानःकु
विःकविमियक्षसिप्प्रयज्ज्यो ॥ ५५ ॥ इन्द्रवायूऽइमे । सुताऽउप

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्प्रयोभिरागतम् ॥ इन्द्रंवोवामुशन्तिहि ॥ ५६ ॥ मित्रर्ठहुवे । पू
तदक्षंव्वरुणञ्चरिशादसम् ॥ धियङ्घृताचीर्ठसाधन्ता ॥ ५७ ॥ दस्रा
युवाकवः सुतानासत्त्याव्वृक्तबर्हिषः ॥ आयातर्ठरुद्रवर्त्तनी ॥ त
म्प्रत्क्रथायंव्वेनः ॥ ५८ ॥ व्विदद्यदी ॥ व्विदद्यदीसरमारुग्णमद्रेर्म्म
हिपाथः पूर्व्यर्ठसध्र्यक्कः ॥ अग्रन्नयत्सुपद्यक्षराणामच्छारवम्प्रथमा
जानतीगात् ॥ ५९ ॥ नहिस्पशम् ॥ नहिस्पशमविदन्नन्यमस्म्मा
द्वैश्वानरात्पुरऽएतारमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्त्यंवैश्वानर
क्षैत्रजित्त्यायदेवाः ॥ ६० ॥ उग्राव्विघनिना ॥ उग्राव्विघनिनामृधऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इन्द्राग्ग्नीहवामहे ॥ तानोंमृडातऽईदृशे ॥ ६१ ॥ उपास्म्मैगायतान
रःपवमानायेन्दवे ॥ अभिदेवाँऽइयक्षते ॥ ६२ ॥ येत्त्वां । हिह
त्त्यमघवन्नवर्द्धन्येशाम्बरेहरिवोयेगविष्टौ ॥ येत्त्वानूनमनुमदन्तिविं
प्प्राःपिबेन्द्रसोमर्ठसगणोमरुद्भिः ॥ ६३ ॥ जनिष्ठाऽउग्ग्रः । सहसेतु
रायमन्द्रऽओजिष्ठोबहुलाभिमानः ॥ अवर्द्धन्निन्द्रम्मरुतश्चिद्दत्रमा
तायद्वीरन्दधनद्धनिष्ठा ॥ ६४ ॥ आतू ॥ आतूनऽइन्द्रवृत्त्रहन्नस्म्माकं
मर्द्धमागहि ॥ महान्महीभिरूतिभिः ॥ ६५ ॥ त्त्वमिन्द्र ॥ त्त्वमिन्द्र
प्प्रतूर्तिष्ष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनितावित्त्वतूरं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. सि॒त्त्वन्तूं॒ष्य॑तरु॒ष्ष्यु॒तः॑ ॥ ६६ ॥ अनुं॒ते ॥ अनुं॒ते॒शुष्म॑न्तु॒रय॑न्तमी
॥२६२॥ यतु॒ᳫ्क्षो॒णी॒शिशु॒न्नमा॒तरा॑ ॥ वि॒श्वा॑स्ते॒स्पृध॑ः॒श्नथ॒यन्तमु॒न्न्यवे॑वृ॒त्रं
ष्य॑दि॑न्द्र॒तूर्व॑सि ॥ ६७ ॥ य॒ज्ञोदे॒वाना॑म् ॥ य॒ज्ञोदे॒वाना॒म्प्रत्त्ये॑ति॒सु
म्न॒मादि॑त्त्यासो॒भव॑तामृड॒यन्त॑ः ॥ आवो॒र्व्वाची॑सुम॒तिर्व्ववृ॒त्त्याद॒ᳫ्ᳫ॒हो
श्चि॒द्याव॑रिवो॒वित्त॒रास॑त् ॥ ६८ ॥ अद॑ब्धेभिः॒सवितः॑ । पा॒युभि॒ष्ट्व
ᳫ्शि॒वेभि॑र॒द्यपरि॑पाहि॒नो॒गय॑म् ॥ हिर॑ण्यजिह्वः॒सुवि॒तायन॒व्यसे॒रक्षा॒
उ.अ. माकि॑र्न्नो॒ऽअ॒घश॑ᳫ्स॒ऽईशत ॥ ६९ ॥ [१५] प्रवी॒र॒या । शुच॑यो॒दद्रि॒रे
३३ वाम॒द्ध्व॒र्यु॒भि॒र्म्मधु॑मन्तᳫ्सु॒तास॑ः ॥ वह॑व्वायो॒नि॒यु॒तो॑या॒ह्यच्छा॒पिबा॑

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुतस्यान्धंसोमदाय ॥ ७० ॥ गावऽउप । गावऽउपावतावुतम्मुही
यज्ञस्यरप्प्सुदा ॥ उभाकर्णाहिरण्ययां ॥७१॥ काव्ययंयोराजानेषु ॥
काव्ययंयोराजानेषुक्रत्वादक्षंस्यदुरोणे ॥ रिशादसासधस्त्थऽआ ॥
॥७२॥ दैव्यांवद्ध्वर्य्यू ॥ दैव्यांवद्ध्वर्य्यूऽआगंतुरथेनसूर्य्यत्वचा ॥ म
द्ध्वांयुज्ञठसमंञ्जाथे ॥ तम्प्रुत्क्कथायंव्वेनः ॥ ७३ ॥ तिरुश्चीनोव्वित
तः ॥ तिरुश्चीनोव्विततोरुश्मिरेषामुधःस्विदासी ३ दुपरिंस्विदासी
३ त् ॥ रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्त्तात्त्प्रयंतिःपु
रस्त्तात् ॥ ७४ ॥ आरोदसीऽअपृणदास्वंम्महज्जातंयदेनमपसोऽ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधारयन् ॥ सोऽअङ्घुरायुपरिणीयतेकुविरत्त्योनवाजंसातयेचनोहि
तः ॥ ७५ ॥ उक्थेभिर्वृत्रहन्तमा ॥ उक्थेभिर्वृत्रहन्तमायामन्दानाचि
दागिरा ॥ आङ्गूषैराविवासतः ॥ ७६ ॥ उपनः ॥ सूनवोगिरःशृण्व
न्त्वमृतस्यये ॥ सुमृडीकाभवन्तुनः ॥ ७७ ॥ ब्रह्माणिमे । मतयः
शꣳसुतासःशुष्मइयर्त्तिप्रभृतोमेऽअद्रिः ॥ आशासतेप्रतिहर्य्य
न्त्युक्थेमाहरीवहतस्तानोऽअच्छ ॥ ७८ ॥ अनुत्तमाते । मघवन्न
किर्नुनत्वावाꣳ२ऽअस्तिदेवताविदानः ॥ नजायमानोनशतेनजातो
यानिकरिष्याकृणुहिप्रवृद्ध ॥ ७९ ॥ तादित् ॥ तादिदासभुवनेषुज्ज्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुँष्यतोयुज्ञऽउग्रस्त्वेषनृम्म्णऽं ॥ सुद्योजंज्ञानोनिरिंणातिशत्रूननुयं
व्विश्वेमदुन्त्यूमांऽं ॥ ८० ॥ इमाऽउंत्त्वा । पुरूवसोगिरोंव्वर्द्धन्तुया
ममं ॥ पावुकवंर्णाऽंशुचंयोव्विपुश्चितोभिस्त्तोमैरनूषत ॥ ८१ ॥ यस्या
यम् ॥ यस्यायंव्विश्वऽआर्य्योयासंःशेवधिपाऽअरिः ॥ तिरश्चिद
र्य्येरुशमेपवीरवितुब्भ्यंत्सोऽअज्ज्यतेरुयिऽं ॥ ८२ ॥ अयर्ठसुहस्त्र
म् ॥ अयर्ठसुहस्त्रमृषिंभिऽंसहंस्कृतऽंसमुद्रऽइंवपप्प्रथे ॥ सुत्त्यऽंसोऽ
अंस्यमहिमागृंणेशवोयुज्ञेषुंव्विप्प्रराज्ज्ये ॥ ८३ ॥ अदंब्धेभिऽंसवि
तऽं । पायुभिष्ठ्वर्ठशिवेभिरुद्यपरिंपाहिनोगयंम् ॥ हिरंण्यजिह्वऽंसुवि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तायुनव्व्यंसेरक्षुमाकिन्नोऽऽअघशंऽसऽईशत ॥८४॥ [१५ ॥ आनं÷ ॥
आनौयुज्ञन्दिविस्पृशुंवायोयाहिसुमन्मंभिः ॥ अन्तःपुवित्रंऽउपरि
श्रीणानोयंऽशुक्रोऽअंयामिते ॥ ८५ ॥ इन्द्रवायूसुसुन्दृशा । सुह
वेहहंवामहे ॥ यथांनुःसर्व्वऽइज्जनोनमीवःसुङ्गमेसुमनाऽअसंत् ॥८६॥
ऋधंगित्त्था । समर्त्यं÷शशुमेदेवतांतये ॥ योनूनम्मित्रावरुंणावुभि
ष्टंयऽआचुक्रेहुव्यदांतये ॥ ८७ ॥ आयांतम् ॥ आयांतुमुपंभूषतुम्म
ध्वं÷पिबतमश्विना ॥ दुग्धम्पयोवृषणाजेन्याावसूमानोमर्द्धिष्टमागं
तम् ॥ ८८ ॥ प्रैतुं ॥ प्रैतुब्रह्मंणस्पतिःप्प्रदेव्येतुसूनृतां ॥ अच्छांवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रन्नठ्यँम्पुङ्क्तिरांधसन्देवायुज्ञन्नंयन्तुनः ॥ ८९ ॥ चुन्द्रमांऽअुप्प्सु ॥
चुन्द्रमांऽअुप्स्वुन्तरासुंपुण्णोंधांवतेदुिवि ॥ रुयिम्पिुशङ्गंम्बहुलम्पुरु
स्पृहुर्ठ्हरिंरेतिकानिंक्रदत् ॥ ९० ॥ दुेवन्दैंवुंव्वः ॥ दुेवन्दैंवुंव्वोवंसेदुेव
न्दैंवमुभिष्टंये ॥ दुेवन्दैंवर्ठ्हुवेमुव्वाजंसातयेगृणन्तोंदुेव्याधुिया ॥९१॥
दुिविपृष्टः ॥ दुिविपृष्टोऽअंरोचताुग्निर्वैंश्वानुरोबृहन् ॥ क्ष्मयांवृ
धाुनऽओजंसाुचनोंहिताुज्ज्योतिंषाबाधतुेतमंः ॥ ९२ ॥ इन्द्रांग्नीऽ
अपात् ॥ इन्द्रांग्नीऽअुपादियम्पूर्व्वांगात्पुद्वतींब्भ्यः ॥ हित्वीशिरोंजुि
ह्वयाुव्वावंदुच्चरांत्त्रिर्ठ्शत्पुदान्न्यंक्रमीत् ॥९३॥ दुेवासोहिष्मा । मनंवुेस

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंन्यवब्रो विश्वैसाकꣳसरातयः॥ तेनोऽअद्यतेऽअपरन्तुचेतुनोभवन्तुव

रिवोविदंः॥ ९४ ॥ अपाधमत्॥ अपाधमदभिशंस्तीरशस्तिहाथे
न्द्रोद्युम्न्याभंवत्॥ देवास्तंऽइन्द्रसख्यायंयेमिरेबृहंद्भानोमरुंद्गण
॥ ९५ ॥ प्रवंः॥ प्रवऽइन्द्रांयबृहतेमरुंतोब्रह्मार्चत॥ वृत्रꣳहंनतिवृ
त्रहाशतक्रंतुर्व्वज्रेणशतपंर्वणा॥ ९६ ॥ अस्येदिन्द्रोवावृधेवृष्ण्यꣳ
शवोमदेसुतस्यविष्णंवि॥ अद्यातमंस्यमहिमानंमायवोनुंष्टुवन्तिपू

र्वथां॥ इमाऽउंत्त्वायस्यायमयꣳसहस्रंमूर्द्धऽऊषुर्णः॥ ९७॥ [१३]

इति श्रीशुक्लयजुःसंहितापाठे त्रयस्त्रिंशोऽध्यायः॥ ३३॥ यज्ञायतःप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्चनद्यःसोमोधेनुमाकृष्णेनपूषंतवदृशकानतदष्टौषडष्टापश्चाशत् ॥
ॐयज्जाग्रंतः॥यज्जाग्रंतोदूरमूदैतिदैवन्तदुसुप्तस्यतथैवेति ॥ दूरङ्
मज्योतिषाज्योतिरेकन्तन्मेमनंःशिवसंङ्कल्पमस्तु ॥१॥ येनकर्म्मा
णि ॥ येनकर्म्माण्यपसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः ॥ य
दंपूर्व्वंयक्षमन्तःप्रजानान्तन्मेमनंःशिवसंङ्कल्पमस्तु ॥ २ ॥ यत्प्र
ज्ञानंम् ॥ यत्प्रज्ञानंमुतचेतोधृतिश्चयज्ज्योतिरन्तरमृतंम्प्रजासु ॥
यस्स्मान्नऽऋतेकिञ्चनकर्म्माक्रियतेतन्मेमनंःशिवसंङ्कल्पमस्तु ॥३॥
येनेदम् ॥ येनेदम्भूतम्भुवंनम्भविष्यत्त्परिगृहीतममृतेनसर्व्वंम् ॥ ये

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नंयुज्ञस्त्तायतैंसुप्तहोतातन्मेमनंः शिवसंङ्कल्पमस्त्तु ॥४॥ यस्मिन्नृ
चंः॥यस्मिन्नृचुःसामुयजूंꣳषियस्मिन्नप्रतिष्ठितारथनाभाविवाराः।
यस्मिँश्चित्तꣳसर्वुमोतम्प्रजानुन्तन्मेमनंः शिवसंङ्कल्पमस्त्तु ॥ ५ ॥
सुषारुथिरश्वानिव ॥ सुषारुथिरश्वानिवुयन्मंनुष्ष्यान्नेनीयतेभीशु
भिर्व्वाजिनंऽइव ॥ हृत्प्रतिष्ठुंय्यदंजिरञ्जविष्ठुन्तन्मेमनंः शिवसंङ्कल्प
मस्त्तु ॥ ६ ॥ पितुन्नु । स्त्तोषम्मुहोधुर्म्मांणन्तविषीम् ॥ यस्यंत्त्रितो
व्योजंसावृत्त्रंविपर्व्वमुर्द्दयंत् ॥ ७ ॥ अन्विदत् ॥ अन्विदंनुमतेत्त्वंमन्न्यासै
शन्नंनस्कृधि ॥ क्रत्त्वेदक्षांयनोहिनुप्प्रणऽआयूंꣳषितारिषः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शतम् ॥१८००॥ अनुंनः ॥ अनुंनोद्यानुंमतिर्य्यज्ञन्देवेषुंमन्यताम् ॥
अग्निश्चंहव्युवाहंनोभवंतन्दाशुषेमयंः ॥९॥ सिनींवालिपृथुंष्टुके ॥
सिनींवालिपृथुंष्टुकेयादेवानामसिस्वसां ॥ जुषस्वंहुव्यमाहुंतम्प्रजा
न्दंविदिदिड्‌निः ॥१०॥ [१०] पञ्चंनुद्यः ॥ पञ्चंनुद्यःसरंस्वतीमपिय
न्तिसस्रोंतसः ॥ सरंस्वतीतुपंञ्चुधासोदेशेभंवत्सुरित् ॥ ११ ॥ त्वम
ग्ने ॥ प्रथुमोऽअङ्गिराऽऋषिर्दुवोदेवानांमभवः शिवःसखां ॥ तवंव्रुतेकु
वयोंविद्मुनापसोजांयन्तमुरुतोंभ्राजंदृष्टयः ॥१२॥ त्वन्नंः ॥ त्वन्नों
ऽअग्नेतवंदेवपायुभिर्म्मुघोनोंरक्षतुन्वंश्चवन्द्य ॥ त्रातातोकस्युतनं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. येगवांमुस्यनिंमेषुर्ठरक्षंमाणुस्त्तवंव्रुते ॥ १३ ॥ त्रुत्तानायामवं । भरा
॥२६७॥ चिकित्त्वान्त्सुद्यःप्रवींताव्वृषंणञ्जजान ॥ अरुंषस्तूंपोरुशंदस्युपाजु
ऽइडांयास्पुत्रोव्वयुनेंजनिष्ट ॥ १४ ॥ इडांयास्त्वा । पुदेव्वयन्ना
भांपृथिव्याऽआधिं ॥ जातंवेदोनिधींमुह्यग्नेंहुव्यायुवोढवे ॥ १५ ॥
प्रमंन्मन्महे । शवसानायंशूषमांङ्गूषङ्गिर्व्वणसेऽअङ्गिरुस्वत् ॥ सुवृक्ति
भिंस्तुवुतऽऋंग्ग्मियायार्च्चांमार्कन्नरेव्विश्श्रुंताय ॥ १६ ॥ प्रवं: ॥ प्रवो
उ.अ. मुहेमहिनमोंभरध्ध्माङ्गुष्यर्ठशवसानायुसामं ॥ येनांनुःपूर्व्वेपितरं:
३४ पदुज्ञाऽअर्च्चन्तोऽआङ्गिरसोगाऽअविन्दन् ॥ १७ ॥ इच्छन्तित्वासो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म्म्यासुः सखायꣳसुन्न्वन्तिसोमन्दधतिप्प्रयांꣳसि ॥ तितिक्षन्तेऽअ
भिशस्तिञ्जनानामिन्द्रत्त्वदाकश्चनहिप्प्रकेतः ॥ १८ ॥ नते । दूरेप
रमाचिद्रजांꣳस्यातुप्प्रयाहिहरिवोहरिभ्याम् ॥ स्त्थिरायवृष्णणेस
वनाकृतेमायुक्ताग्ग्रावाणः समिधानेऽअग्नौ ॥ १९ ॥ अषाढंय्युत्सु ।
पृतनासुपप्प्रिꣳस्वर्षामप्सांवृजनस्यगोपाम् ॥ भरेषुजांꣳसुक्षिति
ꣳसुश्रवसञ्जयन्तन्त्वामनुमदेमसोम ॥ २० ॥ [१०] सोमोधेनुम् ॥
सोमोधेनुꣳसोमोऽअर्वन्तमाशुꣳसोमोवीरङ्कर्म्मण्यन्ददाति ॥ साद
न्यंविदत्थ्यꣳसभेयम्पितृश्रवणंय्योददाशदस्मै ॥ २१ ॥ त्वमि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माः ॥ त्वामिमाऽओषधीः सोम विश्वास्त्वमपोऽअजनयस्त्वङ्गाः ॥
त्वमाततन्थोर्वन्तरिक्षन्त्वञ्ज्योतिषा वितमो ववर्त्थ ॥२२॥ देवेन नः ॥
देवेन नो मनसा देव सोम रायो भागꣳसहसावन्नभि युद्ध्य ॥ मा त्वा त
नदीशिषे वीर्य्यस्योभयेभ्यः प्रचिकित्सा गविष्टौ ॥ २३ ॥ अष्टौ वि॥
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ॥ हिर
ण्याक्षः सविता देवऽआगाद्दधद्रत्ना दाशुषे वार्य्याणि ॥ २४ ॥ हिरण्य
पाणिꣳसविता । विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ॥ अपामी
वाम्बाधते वेति सूर्य्यमभि कृष्णेन रजसा द्यामृणोति ॥ २५॥ हिरण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्रस्त्तोऽअसुरंः । सुनीथःसुंमृडीकःस्ववांयात्त्वर्वाङ् ॥ अपुसेधन्नुक्ष
सोयातुधानानस्त्थाद्देवःप्प्रतिदोषङ्गृणानः ॥ २६ ॥ येतै ॥ येतुपन्थाः
सवितःपूर्व्यासोरेणवःसुकृताऽअन्तरिक्षे ॥ तेभिर्न्नोऽअद्यपथिभिःसु
गेभीरक्षाचनोऽअधिचब्रूहिदेव ॥२७॥ उभापिबतम् ॥ उभापिबतम
श्विनोभानःशर्म्मयच्छतम् ॥ अविद्रियाभिरूतिभिः ॥ २८ ॥ अप्न
स्वतीमश्विनाव्वाचमुस्मेकृतन्नोदस्राव्वृषणामनीषाम् ॥ अद्यूत्त्येव
सेनिह्वयेवांवृधेचनोभवतंव्वाजसातौ ॥ २९ ॥ द्युभिरक्तुभिः ॥ द्युभिर
क्तुभिःपरिपातमुस्म्मानरिष्टेभिराश्विनासौभगेभिः ॥ तन्नोमित्रोव्वरु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णोमामहन्तामादितिꣳसिन्धुः पृथिवीऽउतद्यौः ॥३०॥ [१०]॥ आकृ
ष्णेन । रजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हिरण्ययेनसवि
तारथेनादेवोयातिभुवनानिपश्यन् ॥ ३१ ॥ आरात्त्रि । पार्थिवꣳरजः
पितुरप्प्रायिधामभिः ॥ दिवꣳसदाꣳसिबृहतीवितिष्ठसऽआन्त्वेषंवर्त्त
तेतमः ॥ ३२ ॥ उषस्तत् ॥ उषस्ताच्चित्रमाभरास्मभ्यंवाजिनीव
ति ॥ येनतोकञ्चतनयञ्चधामहे॥३३॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रा
तरिन्द्रꣳहवामहेप्प्रातर्म्मित्रावरुणाप्प्रातरश्विना ॥ प्रातर्भगम्पूषण
म्ब्रह्मणस्पतिम्प्रातःसोममुतरुद्रꣳहुवेम ॥३४ प्रातर्जितम्भगम् ॥प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुर्जितुम्भगंमुग्ग्रह्ँहुवेमव्वुयम्पुत्रमादितुर्य्योविधुर्त्ता ॥ आुद्ध्रश्चिद्यम्म
न्न्यमानस्तुरश्चिद्राजाचिुद्यम्भगम्भुक्षीत्याह ॥ ३५ ॥ भगुप्प्रणेतः ॥
भगुप्प्रणेतुर्भगुसत्यराधोुभगेमान्धियुमुदवादददन्नः ॥ भगुप्प्रनोजन
युगोभिरश्वैर्भगुप्प्रनृभिर्न्नृवन्तःस्याम ॥ ३६ ॥ उुतेदानीम् ॥ उ
तेदानीम्भगवन्तःस्यामोुतप्प्रपित्त्वऽउुतमद्ध्येऽअन्हाम् ॥ उुतोदिता
मघवुन्त्सूर्य्यस्यव्वुयन्देवानांँसुमुतौस्याम् ॥ ३७ ॥ भगऽएवभग
वाः ॥ ऽअस्तुदेवुास्तेनव्वुयम्भगवन्तःस्याम ॥ तन्त्वाभगुसर्व्वऽइज्जो
हवीतिुसनोभगपुरऽएताभवुेह॥३८॥समंध्वुराय ॥ समध्वुरायोुषसोन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. मन्तदधिक्क्रावैवशुच्चंयेपदायं ॥ अर्व्वांचीनंव्वसुविदम्भगंन्नोरथंमिवा
॥२६०॥ श्श्वांव्वाजिनऽआवंहन्तु ॥ ३९ ॥ अश्वांवतीग्गोमंतीः ॥ अश्श्वांवती
ग्गोमंतीर्न्नऽउषासोंव्वीरवंतीःसदंमुच्छन्तुभद्द्राः ॥ घृतन्दुहानाव्विश्श्व
तःप्प्रपीतायूयंपांतस्वस्त्तिभिःसदांनः ॥४०॥ [१०] ॥ पूषन्तवं । व्व्र
तेव्वयन्नरिंष्ष्येमकदांचन ॥ स्त्तोतारंस्त्तऽइहस्म्मसि ॥ ४१ ॥ पथ
स्प्पंथःपरिंपतिम् ॥ पथस्प्पंथःपरिंपतिंव्वचस्याकामेनकृतोऽअभ्य्या
३.अ. नडर्क्कम् ॥ सनोंरासच्छुरुधंश्च्चन्द्राग्ग्राधियंन्धियंसीषधातिप्प्रपूषा
३४ ॥ ४२ ॥ त्रीणिंपदाव्विचंक्क्रमेव्विष्ण्णुग्गोपाऽअदांभ्यः ॥ अतोधम्म्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णिधारयन् ॥४३॥ तद्विप्प्रासः ॥ तद्विप्प्रासोव्विपन्न्यवोजागृवाᳬंसःस
सर्मिन्धते ॥ व्विष्णोर्य्यत्परमम्पदम् ॥ ४४ ॥ घृतवंतीभुवनाना
म् ॥ घृतवंतीभुवनानामभिश्श्रियोर्व्वीपृत्थ्वीमधुदुघेसुपेशसा ॥ द्यावा
पृथिवीव्वरुणस्युधर्मणाव्विष्कंभितेऽअजरेभूरिरेतसा ॥ ४५ ॥ येनःस
पत्न्नाऽअपतेभवन्तिवन्द्राग्ग्निभ्यामवबाधामहेतान् ॥ व्वसवोरुद्द्राऽ
आदित्त्याऽउपरिस्पृशम्मोग्ग्रञ्चेत्तारमधिराजमक्रन् ॥ ४६ ॥ आनो
सत्त्या ॥ त्रिभिरेकादशैरिहदेवेभिर्य्यातम्मधुपेयमश्श्विना ॥ प्रायु
स्त्तारिष्टन्नीरपाᳬंसिमृक्षतᳬंसेधतन्द्वेषोभवतᳬंसचाभुवा ॥ ४७ ॥ ए

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. षर्वं÷ ॥ एषवुस्तोमोमरुतऽइयङ्गीर्म्मान्द्रार्र्यस्यमाुन्यस्यंकारोः ॥
॥२६१॥ एषायांसीष्टतुन्वेवुयांविद्यामुषंवृजनंजीरदांनुम् ॥४८॥ सुहस्तोमाः
सुहच्छंन्दसः ॥ सुहस्तोमाःसुहच्छंन्दसऽआवृतं÷सुहप्रंमाुऽऋषं
यःसुप्तदैव्यां÷ ॥ पूर्वेषाुम्पन्थांमनूदृश्युधीरांऽअुन्वालैभिरेरुथ्योुनरु
श्म्मीन् ॥४९॥ आयुुष्यंवर्च्चुस्यम् ॥ आयुुष्यंवर्च्चुस्युर्ठरायस्पोषु
मौद्भिदम् ॥ इुदर्ठहिरंण्युंवर्च्चंस्वुज्जैत्राुयाविंशतादूमाम् ॥५०॥ननत् ॥न
उ.अ. तद्रक्षांर्ठसिुनपिंशाुचास्तंरान्तिदुेवानाुमोजं÷प्रथमुजर्ठह्युतत् ।योबि
३४ भर्तिंदाक्षायुणर्ठहिरंण्युर्ठसदेुवेषुंकृणुतेदीुर्घमायुुःसमंनुुष्येुषुकृणुते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीर्ग्घमायुः ॥५१॥यदाबध्नन् ॥ यदाबध्नन्दाक्षायुणाहिरण्यꣳशुता
नीकायसुमनुस्यमानाः ॥ तन्मऽआबध्नामिशुतशारदायायुष्ष्मा
ञ्जरदष्टिर्य्यथासम् ॥ ५२ ॥ उतनः ॥ उतनोहिर्बुध्न्यः शृणो
त्त्वजऽएकपात्त्पृथिवीसमुद्रः ॥ विश्वेदेवाऽऋतावृधोहुवानास्तुताम
न्त्राःकविशुस्ताऽअवन्तु ॥ ५३ ॥ इमागिरः ॥ इमागिरऽआदित्त्ये
भ्योघृतस्नूःसुनाद्राजभ्योजुह्वाजुहोमि॥शृणोतुमित्रोऽअर्य्यमाभगो
नस्तुविजातोवरुणोदक्षोऽअꣳशः ॥ ५४ ॥ सुप्तऽऋषयः ॥ सुप्तऽऋ
षयुःप्प्रतिहिताःशरीरेसुप्तरक्षन्तिसदमप्प्रमादम् ॥ सुप्तापःस्वपतो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. लोकमीयुस्तत्त्रंजागृतोऽअस्वंप्प्नजौसत्त्रसदौंचदेवौ ॥ ५५ ॥ उत्तिष्ठ
॥२६२॥ ब्रह्मणस्प्पतेदेवयन्तंस्त्वेमहे ॥ उपप्प्रयन्तुमुरुतंःसुदानंवुऽइन्द्र
प्प्राशूर्भवासचा ॥ ५६ ॥ प्रनूनम् ॥ प्रनूनम्ब्रह्मणस्प्पतिर्म्मन्त्त्रंव
दत्त्युक्थ्यम् ॥ यस्मिन्निन्द्रोव्वरुणोमित्त्रोऽअर्य्यमादेवाऽओकांसि
चक्क्रिरे ॥ ५७ ॥ ब्रह्मणस्प्पते ॥ ब्रह्मणस्प्पतेत्त्वमस्ययन्तासूक्त
स्यंबोधितनंयञ्चजिन्व ॥ व्विश्वन्तद्भद्रंय्यदवन्तिदेवाबृहद्वदेमव्विद
उ.अ. थेसुवीराः ॥ यऽइमाव्विश्वाव्विश्वकर्म्मायोनःपितान्नपतेन्नस्यनो
३४ देहि ॥ ५८ ॥ [१८] इति श्रीशुक्लयजुःसंहितापाठे चतुस्त्रिंशोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्याय: ॥३४॥ अपेतोदशापापाघंद्वादशद्वौद्वाविंशतिः ॥ ॐअपेतऽ ॥
अपेतोयंन्तुपणयोसुंम्नादेवपीयवं÷ ॥ अस्यलोकऽसुतावतऽ ॥ द्युभि
रहोंभिरक्तुभिर्व्यक्तंध्युमोदंदात्त्ववसानंमस्म्मै ॥१॥ सविताते ॥ स
विताातेशरीरेभ्यऽपृथिव्यांल्लोकमिच्छतु ॥ तस्म्मैयुज्ज्यन्तामुस्रि
यां÷ ॥ २ ॥ वायुऽपुंनातु । सवितापुंनात्त्वग्ग्नेर्भ्राजंसासूर्य्यस्यवर्च्चं
सा ॥ विमुंञ्चयन्तामुस्रियां÷ ॥ ३ ॥ अश्वत्त्थेवं÷ ॥ अश्वत्त्थेवोनिष
दंनम्पर्णेवोवसतिष्कृता ॥ गोभाजऽइत्त्किलांसथयत्त्सनवथपूरुष
म् ॥४॥ सविताते । शरीराणिमातुरुपस्त्थऽआवपतु ॥ तस्म्मैपृथि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. विशम्भव ॥ ५ ॥ प्रजापतौत्त्वा । देवतायामुपोदकेलोकेनिदधाम्म्य
॥२६३॥ सौ ॥ अपनुःशोशुचदघम् ॥ ६ ॥ परम्मृत्त्यो ॥ परम्मृत्त्योऽअनुपरे
हिपन्थांय्यस्तेऽअन्न्यऽइतरोदेवयानात् ॥ चक्षुष्म्मतेशृण्वतेतेब्ब्रवीमि
मानःप्प्रजाꣳरीरिषोमोतव्वीरान् ॥ ७ ॥ शंव्वातः । शꣳहितेघृणिःश
न्तेभवन्त्विष्टकाः ॥ शन्तेभवन्त्वग्नयःपार्त्थिवासोमात्त्वाभिशूशुच
न् ॥ ८ ॥ कल्पन्तान्ते । दिशस्तुब्भ्यमापःशिवतमास्तुब्भ्यम्भव
उ.अ. न्तुसिन्धवः ॥ अन्तरिक्षꣳशिवन्तुब्भ्यङ्कल्पन्तान्तेदिशःसर्व्वाः ॥९॥
३५ अश्म्मन्वतीरीयतेसꣳरभद्ध्वमुत्तिष्ठतप्प्रतरतासखायः ॥ अत्त्राजहीमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिवायेऽअसंच्छिवान्वयमुत्तरेमाभिवाजान् ॥ १० ॥ [१०] अपाघ
म् ॥ अपाघमपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्गत्वमस्म
दपदुःष्वप्न्यंसुव ॥ ११ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओ
षधयःसन्तुदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः।
॥ १२ ॥ अनड्वाहमन्वारभामहेसौरभेयंस्वस्तये ॥ सनऽइन्द्रऽइ
वदेवेभ्योवह्निःसन्तारणोभव ॥ १३ ॥ उद्वयम् ॥ उद्वयन्तमसस्प
रिस्वःपश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्यमगन्मज्ज्योतिरुत्तमम् ॥
॥ १४ ॥ इमञ्जीवेभ्यः । परिधिन्दधामिमैषान्नुगादपरोऽअर्त्थमेत

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त ॥ शुतञ्जीवन्तुशुरदंः पुरूचीरुन्तम्मृत्युन्दधताम्पर्वतेन ॥ १५ ॥

अग्नुऽआयूंꣳषि । पवसुऽआसुवोर्ज्जुमिषञ्चनः ॥ आुरेबाधस्वदुच्छु
नांम् ॥ १६ ॥ आयुंष्म्मानग्न्ने । हुविषांवृधानोघृतप्प्रंतीकोघृतयों
निरेधि ॥ घृतम्पीत्त्वामधुचारुगव्यंम्पितेवंपुत्रमुभिरंक्षतादिमान्त्स्वा
हा॥१७॥ परीमे । गामंनेषतुपर्य्युग्निमंहृषत ॥ देवेष्ष्वंक्रतुश्श्रवुः
कऽइमाꣳऽआदंधर्षति ॥ १८ ॥ क्रुव्यादंमुग्निम् ॥ क्रुव्यादमुग्नि

म्प्रहिंणोसिदूरंय्यंमुराज्ज्यंङ्गच्छतुरिप्प्रवाहः ॥ इुहैवायमितंरोजुात

वेदादेवेब्भ्योंहुव्यंवंहतुप्प्रजुानन् ॥ १९ ॥ वहंवुपाम् ॥ वहंवुपाञ्जांत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदꣳपितृभ्योयत्रैनान्वेत्थनिहितान्पराके ॥ मेदंसःकुल्याऽउपता
न्त्स्रवन्तुसत्त्याऽएषामाशिषःसन्नमन्ताꣳस्वाहा ॥ २० ॥ स्योना
पृथिवि । नोभवानृक्षरानिवेशनी ॥ यच्छानःशर्म्मसप्रथाः ॥ अप
नःशोशुचदघम् ॥ २१ ॥ अस्मात्त्वम् ॥ अस्मात्त्वमधिजातो
सित्त्वदयञ्जायताम्पुनः ॥ असौस्वर्गायलोकायस्वाहा ॥ २२ ॥
[१२] ॥ इति श्रीशुक्लयजुःसंहितापाठे पञ्चत्रिꣳशोऽध्यायः ॥३५॥
ऋचंवाचꣳषोडशद्यौःशांतिरष्टौद्वौचतुर्विꣳशतिः ॥ हरिः ॐऋचंवाचं
म् ॥ ऋचंवाचम्प्रपद्येमनोयजुःप्रपद्येसामप्राणम्प्रपद्येचक्षुःश्रोत्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 म्प्रपंद्ये ॥ व्वागोजं÷सुहौजोमयिंप्प्राणापानौ ॥ १ ॥ यन्मे । च्छि
 द्द्रञ्चक्षुंषोहृदंयस्युमनंसोव्वातिंतृणम्बृहस्पतिंर्म्मेतद्दंधातु ॥ शन्नोंभ
वतुभुवंनस्ययस्प्पतिं÷ ॥ २ ॥ भब्भुव÷ ॥ भूब्भुवुःस्वस्तत्त्सवि
तुर्व्वरेंण्युम्भर्गोदेवस्यंधीमहि ॥ धियोयोनं÷प्प्रचोदयात् ॥ ३ ॥ क
यांनः ॥ कयांनश्चित्रऽआभुंवदूतीसुदावृंधःसखा ॥ कयाशचिंष्ठया
वृता ॥ ४ ॥ कस्त्त्वा । सुत्त्योमदांनाम्मर्ठहिष्ठोमत्त्सुदन्धंसः ॥ दृ
 ढाचिदारुजेव्वसु ॥ ५ ॥ अभीषुणःसखींनामविताजंरितृणाम् ॥ शु
 तम्भंवास्यूतिभिं÷ ॥ ६ ॥ कयात्त्वम् ॥ कयात्त्वन्नंऽऊत्त्याभिप्प्रमं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्देसवृषन् ॥ कयांस्त्तोतृब्भ्युऽआभंर ॥ ७ ॥ इन्द्रोव्विश्श्वंस्यराज
ति ॥ शन्नौऽअस्त्तुद्विपदेशञ्चतुंष्पदे ॥ ८ ॥ शन्नोंमित्रःशंव्वरुंणश्शन्नो
भवत्त्वर्य्यमा ॥ शन्नुऽइन्द्रोबृहुस्प्पतिश्शन्नोव्विष्णुंरुरुक्क्रमः ॥ ९ ॥
शन्नोव्वातंः । पवताछुशन्नंस्त्तपतुसूर्य्यः ॥ शन्नुःकनिक्क्रदद्देवःपुर्ज्ज
न्न्योऽअुभिवंर्षंतु ॥ १० ॥ अहांनिशम् ॥ अहांनिशम्भंवन्तुनुः
शॅरात्त्रीःप्प्रतिंधीयताम् ॥ शन्नंऽइन्द्राग्ग्नीभंवतामवौभिःशन्नुऽइन्द्रा
वरुंणारातहंव्व्या ॥ शन्नंऽइन्द्रापूषणाव्वाजंसातौशमिन्द्रासोमांसुवितिा
युशंय्योः ॥ ११ ॥ शन्नंः ॥ शन्नोंदेवीरुभिष्टंयुऽआपोंभवन्तुपीतयें ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शंठयोरुभिस्त्रंवन्तुनः ॥ १२ ॥ स्योनापृथिवि । नोभवानृक्षरानिवे
शंनी ॥ यच्छांनुःशर्म्मसुप्प्रथांः ॥ १३ ॥ आपोहि । ष्ठामयोभुव
स्तानंऽऊर्ज्जेदंधातन ॥ महेरणांयुचक्षंसे ॥ १४ ॥ योवंःशिवतंमो
रसुस्तस्यंभाजयतेहनः ॥ उशतीरिंवमातरः ॥ १५ ॥ तस्म्माऽअ
रंम् ॥ तस्माऽअरंङ्गमामवोयस्युक्षयांयुजिन्न्वंथ ॥ आपोंजुनयंथाच
नः ॥१६॥[१६] द्यौःशान्तिः ॥ द्यौःशान्तिरुन्तरिंक्षुꣳशान्तिःपृथिवी
शान्तिरापुःशान्तिरोषंधयुःशान्तिः ॥ वुनस्प्पतंयुःशान्तिर्विश्श्वेदेवाः
शान्तिर्ब्रह्मुशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥१७॥ दृतेदृᳲहंमा। मित्रस्यंमाचक्षुंषासर्व्वांणिभूतानिसमींक्षन्ताम्॥
मित्रस्याहञ्चक्षुंषासर्व्वांणिभूतानिसमींक्षे ॥ मित्रस्यचक्षुंषासमींक्षा
महे ॥ १८ ॥ दृतेदृᳲहंमा । ज्योक्तेंसन्दृशिंजीव्यासञ्ज्योक्तेंसन्दृशिं
जीव्यासम् ॥ १९ ॥ नमंस्तेहरंसेशोचिषेनमंस्तेऽअस्त्वर्च्चिषें ॥ अ
न्याँस्तेंऽअस्मत्तंपन्तुहेतयंःपावकोऽअस्मभ्यᳲशिवोभंव ॥२०॥
नमंस्ते । अस्तुविद्युतेनमंस्तेस्तनयित्नवें ॥ नमंस्तेभगवन्नस्त
यतंःस्वःसमीहंसे ॥ २१ ॥ यतोयतःसमीहंसेततोनोऽअभंयङ्कुरु ॥
शन्नंःकुरुप्रजाभ्योभंयन्नंःपशुभ्यंः ॥ २२॥ सुमित्रियानंः ॥ सुमि

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

संहि. त्रियानुऽआपुऽओषंधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुय्योस्मान्द्वे
॥२६७॥ ष्टियञ्चंव्वुयन्द्विष्मः ॥ २३ ॥ तच्चक्षुः ॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छु
क्रमुच्चरत् ॥ पश्येमशुरदःशुतञ्जीवेमशुरदःशुतᳬशृणुयामशुरदःशु
तम्प्रब्रवामशुरदःशुतमदीनाःस्यामशुरदःशुतम्भूयश्चशुरदःशुतात्॥
॥२४॥ [८] इतिश्रीशुक्लयजुःसंहितापाठे षट्त्रिंशोऽध्यायः ॥३६॥देव
स्यत्त्वादशयमायत्त्वैकादशद्वावेकाविंᳬशतिः ॥ ओँदेवस्यत्त्वा ॥ सवि
उ.अ. तुःप्प्रसवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ आददेनारिरसि
२७ ॥ १ ॥ युञ्जतेमनः ॥ युञ्जतेमनऽउतयुञ्जतेधियोव्विप्राव्विप्प्रस्यबृह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोविंपुश्चितंः ॥ विहोत्राँदधेव्युनाविदेकुऽइन्नमुहीदेवस्यंसावितुःपरि
ष्टुतिः ॥ २ ॥ देवीँद्यावापृथिवी । मुखस्यंवामुद्यशिरोराद्ध्यासन्दे
वयजनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ ३ ॥ देव्योव
म्म्यः ॥ देव्योवम्म्योभूतस्यंप्रथमुजामुखस्यंवोद्यशिरोराद्ध्यास
न्देवुयजनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ ४ ॥ शतम्
॥१९००॥ इयुत्त्यग्ग्रे ॥ इयुत्त्यग्ग्रंऽआसीन्मुखस्यंतुद्यशिरोराद्ध्यास
न्देवुयजनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ ५ ॥ इन्द्र
स्यौजंः ॥ इन्द्रस्यौजस्त्थमुखस्यंवोद्यशिरोराद्ध्यासन्देवुयजनेपृ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थिद्व्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वा
शीर्ष्णर्णे ॥ मुखायंत्त्वामुखस्यंशीर्ष्णर्णे ॥ ६ ॥ प्रैतुं ॥ प्रैतुब्रह्मंण
स्प्पतिः प्प्रदेव्व्येतुसूनृता ॥ अच्छांव्वीरन्नर्य्यम्पुङ्क्तिराधसन्देवायुज्ञन्न
यन्तुनः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वा
शीर्ष्णर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णर्णे ॥ ७ ॥ मुखस्युशिरः ॥ मु
खस्युशिरोसि ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णर्णे ॥ मुखस्युशिरोसि ॥
मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णर्णे ॥ मुखस्युशिरोसि ॥ मुखायंत्त्वामु
खस्यंत्त्वाशीर्ष्णर्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णर्णे ॥ मुखायंत्त्वामु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ ८ ॥ अश्श्व
स्यत्त्वा । वृष्णश्शुक्नाधूपयामिदेवयजनेपृथिव्याः ॥ मुखायंत्त्वामु
खस्यंत्त्वाशीर्ष्णे ॥ अश्श्वंस्यत्त्वावृष्ष्णश्शुक्नाधूपयामिदेवयजनेपृ
थिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ अश्श्वंस्यत्त्वावृष्णश्शु
क्नाधूपयामिदेवयजनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥
मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥
मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ ९ ॥ ऋजवेत्त्वा । साधवेत्त्वासुक्षि
त्यैत्त्वा ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शीर्ष्णे ॥ मुखायत्त्वामुखस्यत्त्वाशीर्ष्णे ॥१०॥ [१०] खुमायत्त्वा ।
मुखायत्त्वासूर्य्यस्यत्त्वातपसे ॥ देवस्त्वासविताम्मद्ध्वानक्कुपृथिव्याः
सृंखस्पृशस्पाहि ॥ अर्च्चिरसिशोचिरसितपोसि ॥ ११ ॥ अनाधृष्टा
पुरस्तात् ॥ अनाधृष्टापुरस्तादग्नेराधिपत्त्यऽआयुर्म्मेदाःपुत्रवतीद
क्षिणतऽइन्द्रस्याधिपत्त्येप्प्रजाम्मेदाःसुखदापश्चाद्देवस्यसवितुराधि
पत्त्येचक्षुर्म्मेदाऽआश्श्रुतिरुत्तरतोधातुराधिपत्त्येरायस्पोषम्मेदाः ॥
विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्त्यऽओजोमेदाविश्श्वाब्भ्योमानाष्ट्रा
ब्भ्यस्पाहिमनोरश्श्वासि ॥ १२ ॥ स्वाहामरुद्भिः । परिश्रीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वादिवःसुणुंस्पृशंस्पाहि ॥ मधुमधुमधुं ॥ १३॥ गर्भोंदेवानाम् ॥
गर्भोंदेवानांम्पितामतीनाम्पतिःप्प्रजानांम् ॥ सन्देवोदेवेनंसवित्रा
गंतुसर्ठ्ठसूर्य्येणरोचते ॥ १४ ॥ समग्निः ॥ समग्निरग्निनागतुस
न्दैवेंनसवित्रासर्ठंसूर्य्येणारोचिष्ट ॥ स्वाहासमग्निस्तपसागतुसन्दै
व्येनसवित्रासर्ठ्ठसूर्य्येणारूरुचत ॥ १५ ॥ धर्तादिवः ॥ धर्तादिवो
विभातितपसस्पृथिव्यान्धर्तादेवोदेवानाममर्त्त्यस्त्तपोजाः ॥ वाचंम
स्म्मेनियच्छदेवायुवम् ॥ १६ ॥ अपश्यङ्गोपाम् ॥ अपश्यङ्गोपाम
निपद्यमानमाचपरांचपथिभिश्चरन्तम् ॥ ससध्रीचीःसविषूचीर्वसा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नुऽआवंरीवर्तिभुवंनेष्ववुन्तः ॥ १७ ॥ व्विश्श्वासाम्भुवाम् ॥ व्विश्श्वा

साम्भुवाम्पतेव्विश्श्वंस्यमनसस्प्पतेव्विश्श्वंस्यव्वचसस्प्पतेसर्व्वस्यव्वचस
स्प्पते ॥ देवश्श्रुत्त्वन्देवघर्म्मदेवोदेवान्पाह्यत्रप्प्रावीरनुवान्देववी
तये ॥ मधुमार्द्धीभ्याम्मधुमाधूचीभ्याम् ॥ १८ ॥ हृदेत्त्वा । मनं
सेत्त्वादिवेत्त्वासूर्य्यांयत्त्वा ॥ ऊर्द्धोऽअद्ध्वरन्दिविदेवेषुधेहि ॥१९॥ पि
तार्नः ॥ पितानोसिपितानोबोधिनमस्तेऽअस्तुमामाहिंसी ॥ त्वष्टृ

मन्तस्त्त्वासपेमपुत्रान्पशून्मयिधेहिप्प्रजामस्म्मासुधेह्यरिष्टाहंसु

हपंत्त्याभूयासम् ॥२०॥ अहः केतुनां । जुषताछंसुज्ज्योतिज्ज्यौति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षास्वाहा ॥ रात्रिः केतुनाजुषताᳬसुज्ज्योतिज्ज्योतिषास्वाहा ॥२१॥
[११] इति श्रीवाजसनेयशुक्लयजुःसंहितायां दीर्घपाठे सप्तत्रिᳫशोऽ
ध्यायः ॥ ३७॥ देवस्यत्त्वाष्टौयमायत्त्वाक्षत्रस्यत्त्वादशकौत्रयोष्टावि
ᳫशतिः ॥ ॐदेवस्यंत्त्वा ॥ देवस्यंत्त्वासवितुःप्प्रंसवेश्विनोर्ब्बाहुब्भ्यां
म्पूष्ण्णोहस्ताब्भ्याम् ॥ आददेदित्त्यैरास्न्नासि ॥ १ ॥ इडऽएहि ॥
इडऽएह्यदितऽएहिसरस्वत्त्येहि ॥ असावेह्यसावेह्यसावेहि ॥ २ ॥
अदित्त्यैरास्न्नासीन्द्राण्याऽउष्णीषः ॥ पूषासिघर्म्मायदीष्ष्व ॥ ३ ॥
अश्विब्भ्याम्पिन्न्वस्वसरस्वत्त्यैपिन्न्वस्वेन्द्रायपिन्न्वस्व॥स्वाहेन्द्रवत्स्वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेन्द्रं वृत्त्स्वाहेन्द्रं वत् ॥ ४ ॥ यस्ते स्तनः । शशयो यो मयो भूर्यो रत्न
धा वसुविद्यः सुदत्रः ॥ येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धा
तवेकः ॥ उर्वन्तरिक्षमन्वेमि ॥ ५ ॥ गायत्रञ्छन्दः ॥ गायत्रञ्छन्दो
ऽसि त्रैष्टुभञ्छन्दोऽसि द्यावापृथिवीभ्यान्त्वा परिगृह्णाम्यन्तरिक्षेणोप
यच्छामि ॥ इन्द्राश्विना मधुनः सारघस्य घर्म्मम्पात वसवो यजत
वाट् स्वाहा सूर्यस्य रश्मये वृष्टिवनये ॥ ६ ॥ समुद्राय त्वा । वाताय
स्वाहा सरिराय त्वा वाताय स्वाहा ॥ अनाधृष्याय त्वा वाताय स्वाहा
ऽप्रतिधृष्याय त्वा वाताय स्वाहा ॥ अवस्यवे त्वा वाताय स्वाहाऽशिमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दायंत्त्वाव्वातायुस्वाहा ॥ ७ ॥ इन्द्रायत्त्वा । व्वसुमतेरुद्रवतेस्वाहेन्द्रा
यत्त्वादित्त्यवतेस्वाहेन्द्रायत्त्वाभिमातिग्घ्नेस्वाहा ॥ सवित्रेत्त्वऽऋभु
मतेव्विभुमतेव्वाजवतेस्वाहाबृहस्पतयेत्त्वाव्विश्श्वदेव्यावतेस्वाहा ॥
॥ ८ ॥ [८] यमायत्त्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायु
स्वाहाघर्म्मःपित्रे ॥ ९ ॥ व्विश्श्वाऽआशाः ॥ व्विश्श्वाऽआशादक्षि
णसद्विश्श्वान्देवानयाडिह ॥ स्वाहाकृतस्यघर्म्मस्यमधोः पिबतम
श्विना ॥१०॥ दिविधाः ॥ दिविधाऽइमंय्यज्ञमिमंय्यज्ञन्दिविधाः॥
स्वाहाग्नयेयज्ञियायशंय्यजुर्भ्यः ॥ ११ ॥ अश्विनाघर्म्मम् ॥ अ

संहि. श्विनाघर्म्मम्पातुर्ठंहार्द्वानुमहर्दिवाभिरूतिभिः ॥ तुन्त्रायिणेनमो
॥२७२॥ द्यावापृथिवीभ्याम् ॥ १२ ॥ अपातामुश्विना । घर्म्ममनुद्यावापृथि
वीऽअंमर्ठसाताम् ॥ इहैवरातयःसन्तु ॥ १३ ॥ इषेपिन्वस्व ॥ इषेपि
न्वस्वोर्ज्जेपिन्वस्वब्रह्मणेपिन्वस्वक्षत्रायपिन्वस्वद्यावापृथिवीभ्यां
म्पिन्वस्व ॥ धर्म्मासिसुधर्म्मामेन्यस्मेनृम्णानिधारयब्रह्मधार
यक्षत्रन्धारयविशन्धारय ॥ १४ ॥ स्वाहापूष्णे । शरसेस्वाहाग्रा
उ.अ. वभ्यःस्वाहाप्रतिरवेभ्यः ॥ स्वाहापितृभ्यऽऊर्द्ध्वबर्हिर्भ्योघर्म्म
३८ पावभ्यःस्वाहाद्यावापृथिवीभ्याꣳस्वाहाविश्वेभ्योदेवेभ्यः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वाहांरुद्द्रायं । रुद्द्रहूंतयुस्वाहासञ्ज्योतिषाुज्ज्योतिं÷ ॥ अहं÷केतुनां
जुषताꣳसुज्ज्योतिुज्ज्योंतिषाुस्वाहां ॥ रात्त्रिं÷केतुनांजुषताꣳसु
ज्ज्योतिुज्ज्योंतिषाुस्वाहां ॥ मधुंहुतमिन्द्द्रंतमेऽअुग्ग्नावुश्श्यामंतेदे
वघम्म्रुनमंस्त्तेऽअस्त्तुमामांहिꣳसीः ॥ १६ ॥ अभीमम् ॥ अभी
मम्मांहिमादिवंव्विप्प्रोंबभूवसुप्प्रथांः ॥ उतश्श्रवंसापृथिवीꣳसꣳसीं
दस्वमुहाँऽअंसिरोचंस्वदेवुवींतंमः ॥ व्विधूममंग्ग्नेऽअरुषम्मिंमये
ध्वयसृजप्प्रंशस्त्तदर्शुतम् ॥ १७ ॥ यातेंघम्म्रंदिव्व्याशुग्ग्यागांयु
त्र्याꣳहुंविद्धांनें ॥ सातुऽआप्प्यांयतान्निष्ट्यांयतान्तस्यैंतुस्वाहां ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संहि. याँतेंघर्म्मांन्तरिंक्षेशुग्ग्याँत्रिष्टुब्भ्याग्नींध्रे ॥ साँतुऽआप्प्यांयतान्नि
||२७३|| ष्ट्यांयतान्तस्यैंतेुस्वाहा ॥ याँतेंघर्म्मपृथिव्याᳬशुग्ग्याजगंत्त्याᳬ
सदुस्स्या ॥ साँतुऽआप्प्यांयतान्निष्ट्यांयतान्तस्यैंतेुस्वाहां ॥ १८ ॥
[१०] क्षुत्रस्यंत्त्वा । पुरस्पांयुब्ब्रह्मंणस्त्तुन्न्वुम्पाहि ॥ व्विशंस्त्त्वा
धर्म्मँणाव्वयमनुंक्क्रामामसुव्विुतायुनव्व्यंसे ॥ १९ ॥ चतुं÷स्त्राक्क्तिुर्न्नां
भिं÷ ॥ चतुं÷स्त्राक्क्तिुर्न्नाभिंर्ऋुतस्यंसुप्प्रथाुःसनोंव्विुश्श्वायुं÷सुप्प्रथाुःस
उ.अ. नं÷सुव्वायुं÷सुप्प्रथांः ॥ अपुद्वेषोुऽअपुह्वरोुन्न्यव्व्रंतस्यसश्चिम ॥ २० ॥
३८ घर्म्मैंतत् ॥ घर्म्मैतत्त्तेपुरींषुन्तेनुव्वर्द्धस्वुचाचंप्प्यायस्व ॥ व्वुर्द्धिषी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महिंचव्वयमाचंप्प्यासिषीमहि ॥ २१ ॥ अचिंकक्रदुद्धृषाहरिम्मुंहा
न्मित्रोनदर्शतः ॥ सठ्ठसूर्य्यैणदिद्युतदुदधिर्न्निधिः ॥ २२ ॥ सुमि
त्रियानंः ॥ सुमित्रियान्ऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्मै
सन्तुय्योस्मान्द्वेष्टियश्चवंव्वयन्द्विष्म्मः ॥ २३ ॥ उद्वयम् ॥ उद्वयन्तमंसु
स्प्पारिस्वःपश्यन्तऽउत्तरम् ॥ देवन्देवत्रासूर्य्यमगंन्मज्ज्योतिरुत्तम
म् ॥ २४ ॥ एधोसि ॥ एधोस्येधिषीमहिसमिदंसितेजोसितेजोमयि
धेहि ॥ २५ ॥ यावतीद्यावापृथिवी ॥ यावच्चसप्तसिन्धवोवितस्थिरे॥
तावंन्तमिन्द्रतेग्ग्रहमूर्जागृह्णाम्म्यक्षितम्मयिगृह्णाम्म्यक्षितम् ।२६॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मयित्त्यत् ॥ मयित्त्यादिन्द्रियम्बृहन्मायिदक्षोमयिक्रतुः ॥ घर्म्मस्त्रि
शुग्विराजतिविराजाज्ज्योतिषासुहब्ब्रह्मणातेजसासुह ॥ २७ ॥
पयसोरेतऽआभृतन्तस्युदोहमशीमुह्युत्तरामुत्तराᳬसमाम् ॥ त्त्विषःसंवृक्कत्त्वेदक्षस्यतेसुषुम्म्णस्यतेसुषुम्म्णाग्निहुतः ॥
इन्द्रपीतस्यप्प्रजापतिभक्षितस्युमधुमतऽउपहूतऽउपहूतस्यभक्षया
मि ॥ २८ ॥ [१०] इति श्रीशुक्लयजुःसंहितायामष्टात्रिंशोऽ
ध्यायः ॥ ३८ ॥ स्वाहाप्राणेभ्यःषडुग्रश्चसप्तहोत्रयोदश ॥ ॐस्वाहा
प्प्राणेभ्यः ॥ स्वाहाप्प्राणेभ्युऽसाधिपतिकेभ्यः॥ पृथिव्यैस्वाहाग्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा ॥ दिवे स्वाहा सूर्याय स्वाहा ॥
॥ १ ॥ दिग्भ्यः स्वाहा । चन्द्राय स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहा
वरुणाय स्वाहा ॥ नाभ्यै स्वाहा पूताय स्वाहा ॥ २ ॥ वाचे स्वाहा ।
प्राणाय स्वाहा प्राणाय स्वाहा ॥ चक्षुषे स्वाहा चक्षुषे स्वाहा ॥ श्रोत्राय
स्वाहा श्रोत्राय स्वाहा ॥ ३ ॥ मनसः काममाकूतिं ॥ मनसः काममाकू
तिं वाचः सत्यमशीय ॥ पशूनां रूपमन्नस्य रसो यशः श्रीः श्रयतां म
यि स्वाहा ॥ ४ ॥ प्रजापतिः । सम्भ्रियमाणः सम्राट् सम्भृतो वैश्वदे
वः संसन्नो घर्मः प्रवृक्तस्तेज उद्यत आश्विनः पयस्यानीयमाने पौ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्णणोऽग्निष्ष्यन्दमानेमारुतःक्लथन् ॥ मैत्रःशरीसिसन्तुष्यमानेवायु
र्व्योह्रियमाणऽआग्नेयोहूयमानोवाग्घुतः ॥५॥ सविताप्रथमे । हन्नु
ग्निर्द्वितीयेवायुस्तृतीयऽआदित्यश्चतुर्थेचन्द्रमाःपञ्चमऽऋतुःषष्ठेम
रुतःसप्तमेबृहस्पतिरष्टमे ॥ मित्रोनवमेवरुणोदशमऽइन्द्रऽएकाद
शेविश्वेदेवाद्वादशे ॥ ६ ॥ उग्रश्च । भीमश्चध्वान्तश्चधुनिश्च ॥
सासह्वाँश्चाभियुग्वाचविक्षिपःस्वाहा ॥ ७ ॥ अग्निंहृदयेन ॥ अ
ग्निंहृदयेनाशनिंहृदयाग्रेणपशुपतिङ्कृत्स्नहृदयेनभवंयक्ना ॥
शर्वम्मतस्नाभ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्येनोग्रन्देवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वनिष्ठुनांवसिष्ठहनुःशिङ्गीनिकोश्याभ्याम् ॥ ८ ॥ उग्रँल्लोहितेनमि
त्रँसौव्रत्त्येनरुद्रन्दौर्व्रत्त्येनेन्द्रम्प्रक्क्रीडेनमरुतोबलेनसाद्ध्यान्प्रमु
दा ॥ भवस्यकण्ठ्यँरुद्रस्यान्तःपार्श्व्यम्महादेवस्ययकृच्छर्वस्यव
निष्ठुःपशुपतेःपुरीतत् ॥९॥ लोमभ्यःस्वाहा ॥ लोमभ्यःस्वाहात्व
चेस्वाहात्त्वचेस्वाहालोहितायस्वाहालोहितायस्वाहामेदोभ्यःस्वा
हामेदोभ्यःस्वाहा ॥ माँसेभ्यःस्वाहामाँसेभ्यःस्वाहास्ना
वभ्यःस्वाहास्नावभ्यःस्वाहास्थभ्यःस्वाहास्थभ्यःस्वाहामज्ज
भ्यःस्वाहामज्जभ्यःस्वाहा ॥ रेतसेस्वाहापायवेस्वाहा ॥ १० ॥ आया

 सायुस्वाहा । प्रख्यासायुस्वाहासंख्यासायुस्वाहाविख्यासायुस्वाहा
 ख्यासायुस्वाहा ॥ शुचेस्वाहाशोचंतेस्वाहाशोचमानायुस्वाहाशोका
युस्वाहा ॥ ११ ॥ तपसेस्वाहा ॥ तपसेस्वाहातप्यंतेस्वाहातप्यमा
नायुस्वाहातप्तायुस्वाहाघर्म्मायुस्वाहा ॥ निष्कृत्यैस्वाहाप्रायश्चि
त्त्यैस्वाहाभेषजायुस्वाहा ॥ १२ ॥ यमायुस्वाहा ॥ यमायुस्वाहान्तं
कायुस्वाहामृत्यवेस्वाहा ॥ ब्रह्मणेस्वाहाब्रह्महत्त्यायैस्वाहाविश्श्वे
 ब्भ्योदेवेब्भ्युस्वाहाद्यावापृथिवीब्भ्याᳬस्वाहा ॥ १३ ॥ इति श्रीशु
 क्लयजुःसंहितायां दीर्घपाठे एकोनचत्त्वारिंशततमोऽध्यायः ॥३९॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईशावास्यमष्टाबंधंतमोनवद्धैसप्तदश ॥ ॐईशाव्वास्यम् ॥ ईशाव्वा
स्युमिदꣳसर्व्वुंठ्यत्किञ्चुजगंत्त्याञ्जगंत् ॥ तेनंत्त्युक्तेनंभुञ्जीथामागृंधुꣳ
कस्यंस्विद्धनंम् ॥ १ ॥ कुर्व्वन्नेव ॥ कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छ
तꣳसमाः ॥ एवन्त्वयिनान्यथेतोस्तिनकर्म्मलिप्प्यतेनरे ॥ २ ॥
असुर्य्यानामतेलोकाऽअन्धेनतमसावृताः ॥ तांस्तेप्प्रेत्याभिगच्छ
न्तियेकेचांत्त्मुहनोजनाः ॥ ३ ॥ अनेयदेकंम् ॥ अनेयदेकम्मन
सोजवीयोनैनंद्देवाऽआप्नुवन्पूर्व्वमर्शंत् ॥ तद्धावंतोन्यानत्त्येतितिष्ठत्त
स्मिन्नपोमातरिश्वांदधाति ॥ ४ ॥ तदेजति । तन्नैजंतितद्दूरेतद्वन्ति

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

संहि. के ॥ तदन्तरस्यसर्वस्यतदुसर्वस्यास्यबाह्यतः ॥५॥ यस्तु ॥ यस्तु
॥२७७॥ सर्वाणिभूतान्यात्मन्नेवानुपश्यति ॥ सर्वभूतेषुचात्मानन्ततोनवि
चिकित्सति ॥ ६ ॥ यस्मिन्त्सर्वाणिभूतान्यात्मैवाभूद्विजानतः॥
तत्रकोमोहःकःशोकऽएकत्वमनुपश्यतः ॥ ७ ॥ सपरि ॥ सपर्य्य
गाच्छुक्रमकायमव्रणमस्नाविरंशुद्धमपापविद्धम् ॥ कविर्म्मनी
षीपरिभूःस्वयम्भूर्य्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीब्भ्यःसमा
उ.अ. ब्भ्यः ॥ ८ ॥ अन्धन्तमः । प्प्रविशन्तियेसम्भूतिमुपासते ॥ ततो
४० भूयऽइवतेतमोयऽउसम्भूत्याᳪरताः ॥ ९ ॥ अन्यदेव ॥ अन्यदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुःसंम्भवादुन्यदाहुरसंम्भवात् ॥ इतिशुश्रुमधीराणांयेनुस्तद्विच
चक्षिरे ॥ १० ॥ सम्भूतिञ्च । विनाशञ्चुयस्तद्वेदोभयꣳसुह ॥ विना
शेनमृत्युन्तीर्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥ अन्धन्तमः । प्रवि
शन्तियेऽविद्यामुपासते ॥ ततोभूयऽइवतेतमोयऽउविद्यायाꣳरताः ॥
॥ १२ ॥ अन्यदेव ॥ अन्यदेवाहुर्विद्यायाऽअन्यदाहुरविद्यायाः ॥ इ
तिशुश्रुमधीराणाँयेनुस्तद्विचचक्षिरे ॥ १३ ॥ विद्याञ्च ॥ विद्याञ्चा
विद्याञ्चुयस्तद्वेदोभयꣳसुह ॥ अविद्ययामृत्युन्तीर्त्वाविद्ययामृतम
श्नुते ॥ १४ ॥ वायुरनिलम् ॥ वायुरनिलममृतमथेदम्भस्मान्तꣳ

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरम् ॥ ओ३म् क्रतोस्म्मर ॥ क्लिबेस्म्मरं ॥ कृतॐस्म्मरं ॥१५॥
अग्नेनय । सुपथारायेऽअस्म्मान्विश्वानिदेवव्वयुनानिव्विद्वान् ॥ युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिम्विधेम ॥ १६ ॥ हिरण्मयेनपात्रेण । सत्त्यास्यापिहितम्मुखम् ॥ योसावादित्त्येपुरुषः सोसावहम् ॥ १७ ॥ ओ३म् खम्ब्रह्म ॥ १८ ॥ इति श्रीवाजसनेयसंहितायां दीर्घपाठे चत्वारिंशतितमोऽध्यायः ॥४०॥ श्रीवेदपुरुषार्पणमस्तु ॥ ॥ ॐनमोभगवतेवासुदेवाय ॥ ॐनमोभगवतेशङ्कराय ॥ ॥ दशाध्यायेसमाख्यातानुवाकाःसर्वसङ्ख्यया ॥ शतंदशानु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाकाश्चनवान्येचमनीषिभिः ॥ १ ॥ सप्तषष्ठिश्चितोज्ञेयाःसौत्रेद्वाविंश
तिस्तथा ॥ अश्वएकोनपंचाशत्पंचात्रिंशत्खिलेस्मृताः ॥ २ ॥ शुक्रि
येषुतुविज्ञेयाएकादशमनीषिभिः ॥ एकीकृत्यसमाख्यातंत्रिशतंव्य
धिकंमतम् ॥ ३ ॥ ॥ इति वाजसनेयसंहितायामनुवाकाःसमाप्ताः ॥
॥ श्रीगणेशाय नमः ॥ अथ प्रतिज्ञा ॥ मन्त्रब्राह्मणयोर्वेदनामधेयं त
स्मिञ्छुक्ले याजुषाम्नाये माध्यन्दिनीयके मन्त्रे स्वरप्रक्रिया ह्यनुदा
त्तो मूर्ध्न्युदात्तः श्रुतिमूले स्वरित एवं जात्यादयोऽभिहिता ब्राह्मणे
तूदात्तानुदात्तौ भाषिकस्वारौ तानस्वराणि छन्दोवत्सूत्राणि ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रति.

॥२७९॥

अथान्तस्थानामाद्यस्य पदादिस्थस्यान्यहलसंयुक्तस्य संयुक्तस्या
पि रेफोष्मान्त्याभ्यामृकारेण चाविशेषेणादिमध्यावसानेषूच्चारणे
जकारोच्चारणं द्विर्भाॅवेप्यवमथापरांतस्थस्यायुक्तान्यहलः संयुक्तस्यो
ष्मऽऋकारै रेकारसहितोच्चारणमेवं तृतीयांतस्थस्य क्वचिद्दकारस्य
तु संयुक्तासंयुक्तस्याविशेषेण सर्वत्रैवमथान्त्यस्यान्तस्थानां पदादि
मध्यान्तस्थस्य त्रिविधं गुरुमध्यलघुवृत्तिभिरुच्चारणमथो मूर्द्धन्यो

सू०

ष्मणोऽसंयुक्तस्य टुमृतेसंयुक्तस्य च खकारोच्चारणमध्ययनादिकर्म
स्वर्थवेलायां प्रकृत्या ॥२॥ अथानुस्वारस्यङ्इत्यादेशः शषसहरेफेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य त्रैविध्यमाख्यातं ह्रस्वदीर्घगुरुभेदैर्दीर्घात्परो ह्रस्वो ह्रस्वात्परो दीर्घौ गुरौ परे गुरुः परसवर्णेषत्प्रकृत्या चान्यत्र विसर्गेष्वीषद्धिरामः पदाद्यस्य संयुक्ताकारस्येषद्दीर्घता च भवतीषद्दीर्घता च भवति ॥ ३ ॥ इति कात्यायनपरिशिष्टसूत्रं समाप्तम् ॥ ॥ ॥

॥ श्रीगणेशाय नमः ॥ ॥ अथ वेदपारायणविधिः ॥ ॥ स्थंडिलंकल्पयित्वाग्निमुपसमाधायसंपरिस्तीर्य्याज्येनैताभ्योदेवताभ्योजुहोतिअग्नयेसोमायेंद्रायविश्वेभ्योदेवेभ्यःऋषिभ्यऋग्भ्योयजुर्भ्यःसामभ्यःश्रद्धायैप्रज्ञायैमेधायैधारणायैश्रियैह्रियैसावित्र्यैसवित्रेप्रजापतये

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कांडऋषयेसोमायकांडऋषयेअग्नयेकांडऋषयेविश्वेभ्योदेवेभ्यःकांड
ऋषिभ्यःसंहिताभ्योदेवताभ्यउपनिषद्भ्योयाज्ञकीभ्योदेवताभ्यउप
निषद्भ्योवारुणीभ्योदेवताभ्यउपनिषद्भ्योहव्यवाहायविश्वेभ्यऋग्गणे
भ्योऽनुमत्यैस्विष्टकृतेचपृथक्स्वाहाकारेणव्याहृतिभिश्चपुनःपरिषिंच
ति ॥ समाप्तेचैतायजुषातर्प्पयति । एवमृग्वेदस्यकांडऋष्यादिवर्ज्यं
मास्विष्टकृतस्तेषांस्थानेशतर्चिभ्योमाध्यमेभ्योगृत्समदायविश्वामि
त्रायवामदेवायात्रयेभरद्वाजायजामदग्न्यायगौतमायवसिष्ठायप्रगा
थेभ्यःपावमानीभ्योदेवताभ्यःक्षुद्रसूक्तेभ्योमहासूक्तेभ्योमहानाम्नी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्यइति ॥ ततोवेदादिमारभ्यसंततमधीयीतेत्याहभगवान्बौधाय
नः ॥ इति वेदपारायणोपक्रमविधिः ॥ ॥ अथ वेदपारायणे कलश
प्रतिष्ठापनादिप्रकारः ॥ तीर्थे देवालये गेहे प्रशस्ते सुपरिष्कृते ॥ कल
शंसुदृढंतत्र सुनिर्णिक्तं विभूषितम् ॥ पुष्पपल्लवमालाभिश्चन्दनैःकुंकु
मादिभिः॥मृत्तिकाभिश्चसंमिश्रंवेदिमध्येन्यसेत्ततः॥ पंचाशद्भिःकुशैः
कार्योब्रह्मापश्चान्मुखस्थितः ॥ स्नापितःस्थापितः कुम्भेचतुर्बाहुश्चतु
र्मुखः ॥वत्सजान्वाकृतिंदण्डमुत्तराग्रैःकुशैःकृतम्॥ब्रह्मोपधानेदत्त्वातं
ततःस्वस्त्ययनंपठेत् ॥ प्रतिष्ठांकारयेत्पश्चात्पूजाद्रव्यमथोच्यते ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यज्ञोपवीतनैवेद्यवस्त्रचन्दनकुंकुमैः । स्रग्धूपदीपतांबूलैरक्षतैश्चपिता
महम् ॥ ब्रह्मयज्ञानमिति वागायत्र्यावाप्रपूजयेत् ॥ उपाध्यायश्चसंपू
ज्योयथापाठंपठेत्ततः ॥ इति वेदपारायणेकलशप्रतिष्ठापनादिप्रकारः॥
॥ ॥ अथानक्षत्रपारायणविधिः ॥ ॥ अथातोनक्षत्रपारायणविधिं
व्याख्यास्यामः ॥ आसमाप्तेर्नाश्नीयात् यथाशक्तिवाऽऽपःपयः फ
लान्योदनंवाहविष्यमल्पं भुक्त्वातदाशेषमधीयीत ॥ ग्रामात्प्राची
मुदीचींवादिशमुपगम्याग्निमुपसमाधाय परिस्तीर्येध्मं प्रदायाज्येनै
ताभ्योदेवताभ्योजुहोति ॥ अग्नये सोमायेन्द्राय प्रजापतये बृहस्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तयेविश्वेभ्यो देवेभ्यो ब्रह्मणे ऋषिभ्यऋग्भ्यो यजुर्भ्यः श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पतये अनुमतये श्रियै ह्रियै सावित्र्यै सवित्रे प्रजापतये कांडऋषये सोमाय कांडऋषये विश्वेभ्यो देवेभ्यःकांडऋषिभ्यःसाहितीभ्योदेवताभ्य उपनिषद्भ्यो याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यो वारुणीभ्यो देवताभ्य उपनिषद्भ्योहव्यवाहाय विश्वेभ्यऋग्गणेभ्य अनुमत्त्यै स्विष्टकृतेच पृथक्स्वाहाकारेण हुत्वा व्याहृतिभिश्च पुनःपरिषिञ्चति ॥ समाप्तेचैतायजुषा तर्पयति एवमृग्वेदिकानां कांडऋष्यादिवर्जमास्विष्टकृतस्तेषांस्थाने शतर्चिभ्यो माध्यमेभ्यो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृत्समदाय विश्वामित्राय वामदेवायात्रये भरद्वाजाय जामदग्न्याय गौतमाय वसिष्ठाय प्रगाथेभ्यः पावमानीभ्यः क्षुद्रसूक्तेभ्योमहानाम्नीभ्य इति ॥ ततो वेदादिमारभ्य संततमधीयीत ॥ नास्यान्तरानध्यायो नास्यान्तराजननमरणेअशुचीनान्तराव्याहरेन्नान्तराविरमेत् यावदन्तमधीयीत ॥ यद्यन्तराविरमेत्त्रीन्प्राणायामानायम्य प्रणवं वा प्रणिधाय यावत्कालमधीयीत ॥ ततः सर्वं निशोनिशान्तरं संग्रामारण्यसलिलं प्रलोप्यपरिदध्यात् ॥ आदावन्तेच ब्राह्मणभोजनं दक्षिणादानंच दद्यात् ॥ परातेन विधिनावेदमधीयीत सततः पूतोवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोभवति मनःशुद्धश्चभवति॥द्वाभ्यां पारायणाभ्यां ऋग्भिश्च॥भोजन
इहाधीत अनृतेभ्यः प्रमुच्यते॥ त्रिभिर्बहुभ्यः पातकोपपातकेभ्यः शू
द्रायां रेतःसिक्त्वागंगासुनिमज्जंश्चभवति॥चतुर्भ्यः शूद्रान्नभोजनात्त
त्सेवनात्तत्स्त्रीसेवनाच्च ॥ पञ्चभिरयाज्ययाजनात्पूतोभवति ॥ अग्रा
ह्यग्रहणाद्ग्राह्याग्रहणादभ्यासोपासनाच्च षड्भिर्ब्राह्मणस्य लोहित
करणात्स्त्रीलोहितकरणात्पशुहननात्सुवर्णस्तेयात्पतितसंप्रयोगाच्च।
सप्तभिः प्राजापत्यानांहीनाचरणाद्यज्ञोपवेधनाच्च ॥ अष्टभिश्चान्द्रा
यणस्यान्तरानाचरणाद्गुरुतल्पगमनाद्रजस्वलागमनाच्च ॥ नवभिः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरापानाच्च ॥ दशभिरश्रोत्रिययाजनादसोमपानादन्यायतश्च ॥ ए
कादशभिर्ब्राह्मणहननाद्गर्भहननात् ॥ द्वादशभिःपूर्वजन्मेहजन्मकृतैः
सर्वैः पापैः प्रमुच्यते स्वर्गलोकं गच्छाति पितॄन्स्वर्गलोकं गमयत्य
ग्निष्टोमादीन्तून्यजाति तैः क्रतुभिरिष्टंभवति ॥ वेदाध्यायी सदै
वस्याद्यथावैसत्यवाक्शुचिः ॥ यंयंकामयतेकामंतंतंवेदेनसाधयेत् ।
असाध्यं नास्ति यत्किंचिद्ब्रह्मणोहिफलंमहद्ब्रह्मणोहिफलंमहादिति
समाप्तौ यजुषातर्पयतीति ॥ समाप्ते वेदपरायणे समाप्ते एतादेवताःपू
र्वोक्ताअग्निसोमाद्यजुषातर्पयाति यजुर्वेदपरायणे तस्यवेदस्यप्राधान्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुच्यते अथवाभूरादिव्याहृतिचतुष्टयात्मकं यजुःशब्देनगृह्यते ॥ तेनै तदुक्तंभवति ॥ भूर्देवांस्तर्पयामीत्यनेनप्रकारेणतर्पयित्त्वा अग्नि सोमादींस्तर्पयेदिति ॥ नास्यांतराजननमरणे ॥ अशुचीइतिनाशुचि हेतुभूतेइत्यर्थः ॥ नांतराव्याहरेदिति ॥ उपक्रांतवेदपारायणमध्ये न व्याहरेन्नाध्यापयेत्तथा लौकिकवचनमपि न ब्रूयात् ॥ विहितं नित्य नैमित्तिकं कर्मानुपयुक्त्वावाक्तिं न कुर्यादित्यर्थः ॥ निशोनिशान्तरं संग्रामारण्यसलिलं लोप्यपरिदध्यादिति लोप्यछित्त्वापरिहार्य्यं वर्ज यित्त्वेत्यर्थः इतियावत् ॥ परिदध्यात्समापयेत् ॥ निशान्तरं निशी

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थः संध्यावा ॥सलिलं वृष्टिरुदकसमीपभूमिकावा॥निशादिकालान्द
शांश्चवर्जयित्त्वा समापयेदित्त्यर्थः ॥ सततः पूतोवेदोभवतीति वेदो
भवति वेदात्मको भवति उत्कृष्टज्ञानवान्भवेदित्यर्थः ॥ द्वाभ्यां पारा
यणाभ्यां ऋग्भिश्चेति ऋग्भिः पावमानीभिः पारायणद्वयं पावमान्य
श्चमिलित्त्वोक्तफलायकल्प्येते इत्यर्थः॥एवमुत्तरत्र पारायणत्रयं गंगा
स्नानंचामिलित्वा साधनम्॥निमज्जंश्च भवति पूतोभवतीत्त्यर्थः॥प्रजा
पत्यानाचरणं प्रक्रान्तप्राजापत्यानामननुष्ठानम् एवं चान्द्रायणस्या
नाचरणं यज्ञोपवेधनं यज्ञविनाशः ॥ इत्यनश्नत्पारायणविधिः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरतोनमस्काराअपरेजातानामरुद्राः सभाभ्यइत्यादयोनमोवःकिरि
केभ्यइत्यग्निवायुसूर्यहृदयभूताः पंचव्याहृतयोबहुरुद्रदेवत्याः॥२३॥
अश्मन्मारुतमश्मँ४स्तेश्मामय्याशीर्य्यंद्विष्मआभिचारिमिमामआ
ग्नेयमृतवोबृहतीपंक्तिर्वासमुद्रस्य द्वेगायत्र्यावुपज्मंजगतीत्रिष्टुब्वाऽपा
मिदंबृहत्यग्नेपावकवसूयवःसनोमेधातिथिरेतआग्नेय्यौगायत्र्यौपा
वकयाजगतींभरद्वाजोनमस्तेबृहतीमाग्नेयीमृषिसुतालोपामुद्रा ॥
॥ २४ ॥ नृषदेपंचाग्नेयानिषेदेवाजगत्यौप्राणदेवत्येप्राणदाबृहती
पंक्तिर्वाऽऽग्येय्यग्निस्तिग्मेनाग्नेयींगायत्रींभरद्वाजोयइमावैश्वकर्म्म

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स.नु. णीस्त्रिष्टुभोविश्वकर्माभौवनः ॥ २५ ॥ आशुरैंद्रीद्वादश ॥ त्रिष्टुभो
॥९०॥ प्रतिरथोवसृष्टानुष्टुबिषुदेवत्याप्रतयोद्धून्स्तौत्यष्टुबसौयामारुतीत्रि
ष्टुब्यत्रलिंगोक्तदेवता पंक्तिर्मर्म्माणिलिंगोक्तैवत्रिष्टुबुदेनं तिस्रोनुष्टुभ
आद्याग्नेयीद्वितीयैंद्रीतृतीयालिंगोक्तदेवता पंचदिशःपंचयज्ञाग्निसाध
नवादिन्यऽआद्येद्वेत्रिष्टुभौ तृतीयापंक्तिर्बृहतीवाचतुर्थीबृहत्येवांत्या
त्रिष्टुब्विमानोद्वे आदित्यदेवत्येआद्याविश्वावसोर्द्वितीयाप्रतिरथस्य
सू.अ. देवहूर्विधृतिरनुष्टुब्यज्ञदेवत्यावाजस्यैंद्र्यनुष्टुबुद्ग्राभमैंद्राग्न्यनुष्टुबेव
२ ॥ २६ ॥ क्रमध्वंपंचाग्नेय्यः ॥ आद्यानुष्टुप्ततास्त्रिष्टुप्ततोबृहतीपिपीलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कमध्याततोनुष्टुप्त्रिष्टुबंत्याग्नेसहस्राक्षविराडाग्नेयीसुपर्णोद्वे पंक्ति
त्रिष्टुभौतार्ठंसवितुः सावित्रींत्रिष्टुभंपुरस्ताज्ज्योतिषं कण्वो दर्शविधे
माग्नेयींगृत्समदस्त्रिष्टुभमस्यास्त्रिस्थानोग्निर्द्देवताप्रेद्धोविराडाग्नेयी
वसिष्ठस्य चित्तिंवैश्वकर्मण्यतिजगतीसप्तआग्नेयीत्रिष्टुप्सप्तऽऋषी
णाम् ॥२७॥ शुक्रज्योतिःषण्मारुत्यः ॥ आद्याचतुर्थीचोष्णिग्द्विती
यातृतीयाच्चगायत्रीपंचमीजगती षष्ठीगायत्र्युष्णिग्वंदंदैवीमारुतामि
मंत्रयोदशर्च्चंआग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वावसोर्द्धा
राभिवादिनीवाघृतंमिमिक्षेगृत्समदःसमुद्राद्वामदेवश्चत्वारिशृङ्गायज्ञ

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

पुरुषदेवत्यऋषभोमंत्रः।२८। वाजश्चमेदेवानामार्षम् ॥ एतैर्यजुभिर्यज
मानाग्नेःकामान्याचतेवाजप्रसवीठंसप्तर्चंविश्वे त्रैष्टुभंवैश्वदेवंलुशोधा
नाकोवाजोनस्तिस्त्रोन्नदेवत्याआद्यानुष्टुब्द्धेत्रिष्टुभौसंमाविराजावाग्ने
ठ्यौसरस्वत्यौलिंगोक्तदैवतम् ॥२९॥ ऋताषाड्गन्धर्वाप्सरसः ॥ स्रनः
प्राजापत्याप्रस्तारपंक्तिःसमुद्रोसिवायव्यानित्रीणिरुचमाग्नेय्यनुष्टुप्त
त्वावारुणीत्रिष्टुभठंशुनःशेपःस्वर्णाग्नेयानिपंचाग्निंयुनज्म्याग्नेय्यास्ति
स्त्रआद्येद्धे त्रिष्टुभौपंक्तिस्तृतीयादिवोद्धआग्नेय्यौ परोष्णिग्भशपदपं
क्ती इष्टोयज्ञोव्द्यृचंयजमानाग्निदेवत्यंगालवआद्योष्णिग्द्वितीयागाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्री ॥ ३० ॥ यदाकूतादष्टर्चमाग्नेयम् ॥ विश्वकर्म्मणस्तृतीयादैवीवा
द्याजगतीतिस्रास्त्रिष्टुभश्चतस्रोनुष्टुभोग्निरस्म्यग्न्यद्वैतवादिनींत्रिष्टुभं
देवश्ववादेववातश्चभारतावृचोयजुर्षेअग्नेयोनुष्टुबाग्नेयी ॥ ३१ ॥ वार्त्र
हत्यायसप्तर्च्चमिन्द्रोपश्यत् ॥ आद्येद्वेवार्त्रघ्न्यौगायत्रीत्रिष्टुभौविश्वा
मित्रस्यचविनोनुष्टुम्मृगोनात्रिष्टुप्प्रथमार्द्धंशासो भारद्वाजोद्वितीयांज
यऐंद्रोद्वेवैश्वानर्य्यौगायत्रीत्रिष्टुभौपृष्टोदिविकुत्सस्यचाऽश्यामद्वेत्रि
ष्टुभावाग्नेय्यौ कामवत्यावश्यामभरद्वाजस्यच वयंतेकात्स्योत्कील
स्यच धामच्छदनुष्टुब्वैश्वदेवी ॥३२॥ अथसौत्रामणीप्रजापतेरार्षम्॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स.नु. अश्विनोःसरस्वत्याश्वस्वादींत्वानुष्टुप्सुरासोमदेवत्यासोमोसिचत्वा
॥६२॥ रिसौराणिपरितोभारद्वाजःसौमींबृहतींऽवायोस्तृचोगायत्रःसौम्यआ
भूतेर्ब्रह्मक्षत्त्रंत्रिष्टुप्सुरासोमदेवत्यानानाहिजगतीसुरासोमदेवत्या
तेजोसिपयोदेवत्यान्योजोसिसुरादेवत्या निषाव्याघ्रंहैमवर्च्चैरनुष्टु
ब्विषूचिकास्तुतिर्यदापिपेषाग्नेयीबृहतीसम्पृचस्थपयोग्रहाविप्रच
स्थसुराग्रहादेवायज्ञंब्राह्मणानुवाकोविंशतिरनुष्टुभः सोमसंपत् ॥
सू.अ. ॥ ३३ ॥ सुरावंतंचतुर्ऋचंत्रैष्टुभम् ॥ अश्विसरस्वतींद्रदेवत्यंपितृभ्यः
२ सत्तापित्र्याणिपुनन्तुमानवर्च्चंपावमानमाद्येद्वे पित्र्येअनुष्टुभौ प्रजापति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तृतीयांवैखानसआग्नेयींगायत्रींचतुर्थींलिंगोक्तदेवतानुष्टुप्पंचम्याग्ने
यींगायत्रीषष्ठ्याग्नेयींब्राह्मीचगायत्रींब्राह्मयस्तृतीयः पादसौमीसप्त
मीसावित्र्यष्टमीनवमीत्रिष्टुब्वैश्वदेवीयेसमासनाअनुष्टुभौ पित्र्याद्या
द्वितीयायजमानाशीर्द्वेस्तृतीत्रिष्टुब्देवपानपितृपाणौपंथानौब्रवीतीदर्ठं
हविरूह्यवसानाष्टिर्यजमानाशीः ॥ ३४ ॥ उदीरतांत्रयोदशर्च्चंपैत्र्यंत्रैष्टु
भर्ठंशंखएकादशीतुजगत्याच्यजानुदशर्च्चोनुवाको नवपित्र्यादशर्म्यै
द्रीगायत्रीतृतीयाचतुर्थीनवम्योनुष्टुभास्त्रिष्टुभइतराःसोमोराजाष्टर्चम
श्विसरस्वतीन्द्राऽअपश्यन्नाद्यास्तिस्रो महाबृहत्यउपांत्याचचतुर्थ्यं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्तेअतिजगत्यौशेषेअतिशक्कर्य्यौत्र्यवसानेसीसेनतंत्रमाश्विसरस्वतीं
द्रदेवत्याः षोडशजगत्यः ॥ ३५ ॥ क्षत्रस्ययोनिंद्विपदागाय
त्री ॥ आसन्दीदेवताकामात्वाकृष्णाजिनंमृत्योरुक्मावाश्विनोभैषज्ये
न लिंगोक्तदेवतानित्रीणि कोसिप्राजापत्यागायत्री शिरोमेपंचर्चं
मिंद्रशरीरावयवदेवताकं तृतीयागायत्र्यंत्यामहापंक्तिस्त्र्यवसानानु
ष्टुभौत्याःप्रतिक्षत्रेवैश्वदेवंत्रयादेवादैवीपंक्तिस्त्र्यवसाना प्रथमाद्विती
ययोर्वैश्वदेवमाशीर्लिंगं लोमान्यनुष्टुब्लिंगोक्तदेवता ॥ ३६ ॥ यद्दे
वास्तिस्त्रोग्निवायुसूर्यदेवत्याअनुष्टुभः ॥ कुष्माण्डीर्यद्ग्रामेलिंगोक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवतꣳसमद्धेतेद्विपदाविराडापीद्धुपदादिवानुष्टुबाप्युद्वयꣳसौर्यनुष्टुप्प्र
स्कण्वस्यापोऽआद्याग्नेयीपंक्तिरेधोसिसामिद्देवत्येयजुषी समावववर्त्य
निरुक्तागायत्रीवैश्वानरज्योतिर्यजुरभ्यादधाम्याग्नेयंतृचमानुष्टुभमा
श्वतराश्विर ꣳ शुनासौर्य्यनुष्टुप्सिंचंतिपरिसौर्यैन्द्रीचानुष्टुब्धानावंत
मैंद्रीगायत्रीविश्वामित्रस्य चबृहदिंद्रायबृहतीनृमेधपुरुषमेधयोरध्व
र्यौगायत्री ॥ ३७ ॥ याभूतानामात्मप्रवादापंक्तिः ॥ नारा
यणीयाकौंडिन्यस्यप्राणपामेद्धेअनुष्टुबुपरिष्टाद्बृहत्यौलिंगोक्तदेवतेस
मिद्धइन्द्रएकादशाप्रीस्त्रिष्टुभआंगिरसइध्मस्तनूनपान्नराशꣳसइडोब

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिंद्वारउषासानक्ताद्दैव्याहोतारातिस्रोदेवीस्त्वष्टावनस्पतिः स्वाहा
कृतयइत्येताआप्रीदेवता आयातुसप्तत्रिष्टुभऐंद्र्यआमन्द्रैर्बृहत्यायातु
वामदेवस्त्रातारंगर्गआमन्द्रैर्विश्वामित्रएवेद्धसिष्ठः ॥ ३८ ॥ अथहो
त्रंत्रिपशोः ॥ समिद्धोअग्निराप्रीद्वादशाविदाभिरश्विसरस्वतीन्द्रदेवत्या
अनुष्टुभोश्विनाहविस्तिस्रोनुष्टुभएकैकाश्विसरस्वतीन्द्रदेवत्यायइन्द्र
सवितृवरुणदेवत्यास्तिस्रोऽनुष्टुभोश्विनागोभिस्तिस्रोनुष्टुभो युवंपुत्र
मिवानुष्टुप्त्रिष्टुभौ यस्मिन्नश्वासआग्नेय्यौजगतीत्रिष्टुभावश्विनातेज
सैकादशर्च्चेर्ऽशस्त्रंगोमद्वृत्समदस्तृचमाश्विनंगायत्रं पावकानोमधुच्छं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाःसारस्वतमिंद्रायाह्यैंद्रंमधुच्छंदाएवानुक्तमानुष्टुभमश्विसरस्वतीन्द्र
देवत्यम्॥३९॥इमंमेगायत्र्यौत्रिष्टुभौवारुण्यौशुनःशेपः॥त्वन्नस्त्रिष्टुभा
वाग्निवारुण्यौ वामदेवोमहीमूषुत्रिष्टुबादित्यासुत्रामाणंगयःप्लातःसु
नावत्रौस्वर्ग्यागायत्र्यानोमैत्रावरुणीगायत्रींविश्वामित्रःप्रबाहवावसि
ष्ठस्त्रिष्टुभꣳसमिद्धोअग्निरेकादशाप्रमानुष्टुभꣳस्वस्त्यात्रेयस्यार्षंवयो
धाइंद्रोदेवतावसंतेन ऋतुनाषड्चामानुष्टुभंलिंगोक्तदेवतꣳहोतायक्ष
द्द्वादशाप्रीःप्रैषाअश्विसरस्वतींद्रदेवत्याअश्विनौ छागस्यसप्तलिंगोक्त
देवताःप्रैषावनस्पतिमभियूपोग्निꣳस्विष्टकृतꣳस्विष्टकृदग्निर्देवंबर्हिरे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादशानुयाजप्रैषाअश्विसरस्वतीन्द्रदेवत्याऽअग्निमद्यसूक्तवाकप्रैषो
लिंगोक्तदेवतोलिंगोक्तदेवतः॥४०॥इतिसर्वानुक्रमणिकायांद्वितीयोऽ
ध्यायः॥२॥ ॐ अथाश्वमेधश्चतुरोध्यायान्प्रजापतिरपश्यत्॥तेजोसि
सौवर्णंनिष्कमिमामगृभ्णन्संवत्सरो यज्ञपुरुषस्त्रिष्टुभमाभिधालिंगो
क्तानियोअर्वन्तंगायत्र्यद्धेनाश्वस्तुतिःपरोधौलिंगोक्तोग्नयेलिंगोक्तान्ये
वहिंकारायेत्यश्वस्यैकान्नपंचाशच्चेष्टितानिहिरण्यपाणिंपंचर्च्चंठ्सावि
त्रंगायत्रमाद्यांमेधातिथिरग्निंठ्स्तोमेनाग्नेयंतृचंगायत्रं ठं सुतंभरोवि
श्वामित्रोविरूपोयथासंख्यमजीजनोहिपावमानींकृतिं पिपीलिकम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यामनुष्टुभं त्र्यरुणत्रसदस्यूर्व्विभूरश्वदैवतंदेवादैवामिहरंतिराग्नेयानि
चत्वारिकायौद्भृम्भणानिलिंगोक्तान्याब्रह्मलिंगोक्तान्येवाध्यायात् ॥१॥
प्रजापतयेप्राजापत्यम् ॥ यस्तेदेवंयःप्राणतस्त्रिष्टुप्कायी हिरण्यग
र्भस्य युंजन्तिमधुच्छन्दाआदित्यदेवत्यांगायत्रीं युंजंत्यस्याश्वस्तु
तिर्यद्वातोबृहतीमौवसवस्त्वालिंगोक्तानिलाजी ॥ २॥ नश्वदेवत्यंकः
स्विच्चतस्रोऽनुष्टुभःप्रश्नप्रतिप्रश्नभूताब्रह्मोद्येहोतुर्ब्रह्मणश्च वायुष्वालिं
गोक्तानि सर्ठशितस्तिस्रोश्वदेवत्याअनुष्टुब्विराड्त्रिष्टुभोग्निःपशुरा
श्वानित्रीण्यंबेनुष्टुबश्वस्तुतिर्गणानांत्वाचत्वारिलिंगोक्तानि ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्सक्तथ्यागायत्र्याश्वी ॥ एकादशर्च्चमानुष्टुभंद्वितीयातूपरिष्टाद्बृ
हत्यध्वर्य्वादीनांकुमार्य्यादिभिरश्लीलभाषणं ताएवदेवता दधिक्रा
व्णोदधिक्रावावामदेव्यः सुरभिमतीमनुष्टुभमाश्वींगायत्रीं॑ षडचमा
श्वमुष्णिगाद्याश्चतस्रोनुष्टुभोंत्यात्रिष्टुप् कस्त्वाषड्ऋचमाश्वमाद्यागा
यत्रीपंचानुष्टुभः कःस्विदष्टादशर्च्चंब्रह्मोद्यं॑ होत्रादीनांप्रश्नप्रतिप्रश्न
भूतमाद्याश्चतस्रोनुष्टुभः कास्विदाद्याश्चतस्रश्चांत्यादशत्रिष्टुभः सुभूर
नुष्टुब्लिंगोक्तदेवताहोतायक्षत्प्राजापत्यः प्रैषःप्रजापतेर्हिरण्यगर्भःप्रा
जापत्यांत्रैष्टुभम् (४)॥ अश्वस्तूपरइत्यादयः ॥ पशवोध्यायेनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तादेवतावापर्यंग्यास्तथारोहितादयोगुणयुक्ताऽ आरुण्याश्वकपिंज
लादयआध्यायाच्छादंदद्भिरित्यादित्वगित्येतदंत द्रव्यदैवतमुक्तम्॥
॥ ४ ॥ अश्वस्तूपरोब्राह्मणोध्यायः ॥ शादंदद्भिस्त्वचांतश्चजुंबका
यवारुणींद्विपदांमुंडिभओदन्य एषा चाघनाशन्यंतर्ज्जलेयस्येमेका
ग्यौत्रिष्टुभौहिरण्यगर्भः प्राजापत्यआनोदशर्च्चंजागतंवैश्वदेवंगोतमः
स्वस्तिनोविराट्स्थानाभद्रंकर्णेभिस्तृचं त्र्यैष्टुभंमानोश्वस्तोमीयंदी
र्घतमास्त्रैष्टुभं द्वाविंशत्यृचमश्वस्तुतिस्तृतीयाषष्ठ्यौ जगत्यावि
मानुद्वैपदं वैश्वदेवंतृचं भौवनआप्त्योवासाधनभौवनोवा ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निश्चसप्तलिंगोक्तानि ॥ प्रियोदेवानांलौगाक्षिरनुष्टुभमनवसानांबृ
हस्पतेगृत्समदोब्राह्मीं त्रिष्टुभमिंद्रगोमन्नैंद्रयौगायत्र्यौरम्याक्षिर्ऋता
वानंप्रादुराक्षिर्वैश्वानरीयांवैश्वानरस्य त्रिष्टुभंकुत्सोग्निर्ऋषिराग्नेयींगा
यत्रीं वसिष्ठभरद्वाजौमहाँ २ ऽइंद्रोमाहेंद्रीवसिष्ठस्तंवऐंद्रींपथ्याबृहतीं
नोधागोतमोयद्वाहिष्ठंवसूयवआग्नेयीमनुष्टुभमोहिभरद्वाजोगायत्रीमृ
तवस्तेबृहतीत्युपह्वरेवत्सो गायत्रीम् ॥ ६ ॥ उच्चातेगायत्रंतृचठं
सौम्यमामहीयवोनुवीरैर्मुद्गलोयज्ञपुरुषस्त्रिष्टुभमग्नेपत्नीर्मेधातिथि
राग्नेयीं गायत्रीमभियज्ञंद्व्यृचमृतुदैवतं मेधातिथिस्तवायमैंद्रीत्रिष्टुभं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वामित्रोमेवनोजगतीं गृत्समदःस्वादिष्ठयामधुच्छन्दाः सौम्या वनुक्तानांगायत्रम् ॥ ७॥ समास्त्वाग्नेकोध्यायः ॥ प्रजापतेरार्षꣳ सामिधेन्योनवाग्नेय्यस्त्रिष्टुभोग्निनादृष्टाअग्निर्ऋषिः कर्मांगभूतमग्नि ꣳस्तौत्यूर्ध्वाद्वादशर्चमाप्रियमौष्णिहंविषमपदं प्राजापत्यमाग्नेयम ग्निरपश्यदग्निर्हिप्रजापतित्वेनसंस्तूयतेतेनप्राजापत्यम् ॥ ८ ॥ पीवो अन्नाद्वेवायव्ये त्रिष्टुभौवसिष्ठः ॥ आपोहद्वेप्राजापत्येहिरण्यगर्भः प्राजापत्यः प्रयाभिर्द्वेवायव्येवसिष्ठोनियुत्वान्वायव्याःषड्गायोशुक्रो नुष्टुबेकयाचत्रिष्टुबंत्यागायत्र्योनियुत्वान्वायोषेगृत्समदोवायोशुक्रः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरुमीढाजमीढौतववायोव्यश्वआङ्गिरसोभित्वावसिष्ठऐन्द्रप्रगाथंप्र
थमाबृहतीद्वितीयासतोबृहतीत्वामिदेवर्ठंशंसुर्बार्हस्पत्यः कयानऐंद्रं
तृचं गायत्रं वामदेवोऽत्यातु पादनिचृद्यज्ञायज्ञावऊर्जोनपातर्ठं
शंयुः पाहिनोगर्भः प्रागाथएतंतृचंप्रागाथमाग्नेयंद्वबृहत्यौतृतीया
सतोबृहतीसंवत्सरोस्याग्नेयम् ॥ ९ ॥ इन्द्रमिडःसौत्रामणिको
ध्यायः ॥ एकादशप्रयाजप्रैषाऐंद्राआप्रीदेवत्याआद्येनुवाके देवं
बर्हिरनुयाजप्रैषाऐंद्राएकादशैवाग्निमद्यैन्द्रःसूक्तवाकप्रैषस्त्वामद्यप्र
तीकउभयत्रापिसमिधानंमहद्वायोधसआप्रियएकादशप्रयाजप्रैरवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तथैव देवंबर्हिरनुयाजप्रैरवाअग्निमद्यवायोधसःसूक्तवाकप्रैषः॥१०॥
समिद्धोअंजनाश्वमेधिकोध्यायः॥ आद्याआप्रीस्त्रिष्टुभएकादशाश्व
स्तुतिर्बृहदुक्थोवामदेव्योददर्शाश्वोवासामुद्रियय्यंदक्रंदस्त्रयोदशाश्व
स्तुतिस्त्रिष्टुभोभार्गवोजमदग्निर्ददर्शदीर्घतमाश्च समिद्धोऽअद्यद्वाद
शाप्रीस्त्रिष्टुभोजमदग्निः॥११॥ केतुंकृण्वन्नाग्नेयीमानिरुक्तांगायत्रीम
धुच्छन्दाः॥जीमूतस्येवपायुर्भारद्वाजःसंग्रामांगान्यृक्षौस्तौषीत्सन्ना
हंकार्मुकंगुणमात्नींनूणंजगत्यर्द्धंनसारथिमर्द्धंन रश्मीन्हरीन्रथठंर
थगोपायितृअगत्यालिंगोक्तदेवताद्वाभ्यां त्रिष्टुबनुष्टुभ्यामिषुमनुष्ट

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाकशांततोहस्तघ्नंततस्तृचौरथदुंदुभिदेवत्यावैंद्रोर्द्धंचौत्यःसर्वास्त्रि
ष्टुभोनुक्ताआग्नेय्यःकृष्णग्रीवइत्याद्याएकादशिन्योर्द्धयोःपशुदेवता
अग्नयेगायत्रायेतिदशहविषोवेष्टेर्द्देवता ॥ १२ ॥ देवसवितुर्द्वावध्या
यौ ॥ पुरुषमेधोनारायणः पुरुषोददर्शविश्वानिदेवगायत्रीठ्ठंसावित्री
ठ्ठंश्यावाश्वोविभक्तारंमेधातिथिर्ब्रह्मणे ब्राह्मणमितिकण्डिकेतपसेनु
वाकश्चब्राह्मणम् ॥ १३ ॥ सहस्रशीर्षाषोडशर्च्चंमानुष्टुभम् ॥ त्रिष्टुबं
त्यंपुरुषोजगद्वीजमन्त्रदेवताद्य्यःषड्टृचउत्तरनारायणोमंत्र आद्यास्ति
स्रस्त्रिष्टुभो द्वेअनुष्टुभावंत्यात्रिष्टुप् ॥ १४ ॥ तदेवसर्वमेधोध्यायः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मदैवतः सप्तमेहानिसर्वंहोमेविनियुक्तः सर्वंमेधंब्रह्मस्वयंभ्वैक्षतत
दीयंमन्त्रगणंप्रवायुमच्छेत्येतस्मादाद्येद्वेअनुष्टुभौनतस्याद्विपदागाय
त्रीहिरण्यगर्भश्चतस्त्रोमामाहिꣳसीद्यस्मान्नद्वे एताः प्रतीकचोदिता
ब्रह्मयज्ञेध्येयाःसर्वत्रैवमेषोहचतस्त्रस्त्रिष्टुभआपोहष्ठाश्चित्प्रतीकचोदि
ते ॥ १५ ॥ वेनस्तत्पंचात्रिष्टुभः ॥ सदसस्पतिंतृचेनमेधाकामोमेधां
याचतेप्रथमागायत्रीलिंगोक्तदेवताद्वितीयाग्नेय्यनुष्टुप् तृतीयालिंगो
क्तदेवतानुष्टुबिदंमेमांत्रवर्णिक्यनुष्टुबेतया देवेभ्यःश्रीकामोयाचतेश्रि
यम् ॥ १६ ॥ अस्या जरासः ॥ सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमे

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

हनिपुरोरुच आग्नेय्यआद्येद्वेऐंद्रवायवस्यास्याजरासोबत्सप्रीर्हरयोधू
मकेतवोविरूपोयजमानोद्वेमैत्रावरुणस्ययजमानोगोतमोद्वेविरूपेशु
क्रस्यकुत्सोयमिहमंथिनोवैश्वदेवग्रहग्रहणेत्रीणिशताविश्वामित्रऐंद्रा
ग्नस्याग्निर्वृत्राणिभरद्वाजोवैश्वदेवस्य विश्वेभिःसोम्यंमेधातिथिराय
न्मरुत्वतीययोर्द्वे आयत्पराशरःशाक्त्योऽग्नेशर्द्धात्रिदुहिताविश्ववारा
त्वार्ठंहिभरद्वाजस्त्वेअग्नेद्वेबृहत्यावादित्यस्यत्वेअग्नेवसिष्ठः श्रुधिप्र
स्कण्वआदित्यग्रहग्रहणेविश्वेषामदितिर्वामदेवोगोतमोमहोअग्नेःसा
वित्रस्यलुशोधानाकोऽनुक्तगायत्रंत्रैष्टुभम् ॥ १७ ॥ इन्द्रस्तुत्युक्थ्यो

Nepal Sanskrit University, Balmecki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयेहनि ॥ ऐंद्यः पुरोरुचोद्वादशप्रतीकचोदितेच द्वे तिस्रश्चापश्चिद्ध
सिष्ठोगावउपपुरुमीढाजमीढौयदद्यवसिष्ठआसुतेसुनीतिरातिष्ठतं वि
श्वामित्रःप्रवःसुचीकोबृहतीन्त्रिशोकइन्द्रेहिमधुच्छन्दाइन्द्रोवृत्रविश्वा
मित्रः कुतस्त्वमगस्त्यआतद्वौरीवितिशाक्त्यइमान्तेकुत्सोजगतीम
नुक्तंगायत्रंत्रैष्टुभम् ॥ १८ ॥ सूर्यस्तुत्युक्थ्येतृतीयेहनि ॥ सौर्यश्चतु
र्दशपुरोरुचस्तिस्रश्च प्रतीकोक्ताविभ्राड्बृहज्जगती विभ्राट्सौर्य उदु
त्यं तिस्रः प्रस्कण्वआनोगस्त्योयदद्यश्रुतकक्षःसुतंकक्षौतरणिःप्रस्क
ण्वस्तत्सूर्य्यस्य द्वेकुत्सोबणमहाँ २ ॥ द्वेजमदग्निर्बृहती सतोबृह

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

त्यौश्चायंतइवनृमेधोबृहतीमत्यद्यादेवाः कुत्सआकृष्णेनाहिरण्यस्तूप
आंगिरसोनाख्यातर्ठ्सौर्यंगायत्रंत्रैष्टुभमम् ॥ १९ ॥ वैश्वदेवस्तुतिच
तुर्थैहनि ॥ वैश्वदेव्यः पुरोरुचएकादशषट्चप्रतीकोक्ताः प्रवावृजेवसि
ष्ठास्त्रिष्टुभइंद्रवायूबृहस्पतिंद्वेमेधातिथिरधिनः कुसीदीकाण्वोग्नइन्द्रप्र
तिक्षत्रइन्द्राग्नीमित्रावरुणाजगतीं काश्यपो वत्सारोऽस्मेरुद्राः प्रगाथो
वाँचोऽअद्यकूर्म्मोंगात्सर्मदोविश्वेअद्यलुशाधानाकोविश्वेदेवाःसुहोत्रो
देवेभ्योहिवामदेवोजगतीमनुक्तंगायत्रंत्रैष्टुभमम् ॥२०॥ अथाऽनारभ्या
धीतंमंत्रगणम् ॥ अर्वाकिपतृमेधादादित्ययाज्ञवल्क्यौदहशतुःप्रवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युंपंचदशर्च्चः पुरोरुग्गणोद्वेचप्रतीकोक्तेप्रवायुमृजिश्वोमित्रर्ठंहुवेद्वेम
धुच्छन्दामित्रं लिंगोक्तादस्त्रासुवाकवआश्विनींविदध्यधैन्द्रींकुशिकोन
हिस्पर्शंविश्वामित्रोवैश्वानरीमुग्राविघनिनैन्द्राग्नींभरद्वाजउपास्मै सौ
मींदेवलोसितोवा येत्वाविश्वामित्रोजनिष्ठाउग्रोगौरीवितिरातुवामदे
वस्तृचमैन्द्रंत्वामिंद्रैंद्रयौनृमेध:पथ्याबृहतीसतोबृहत्यौयज्ञोदेवानांकु
त्सोदब्धेभि:सावित्रींजगतींभरद्वाज:॥२१॥ प्रवीरयापंचदशर्च:पुरोरु
ग्गण: ॥ द्वेचप्रतीकोक्तेप्रवीरयावसिष्ठोवायव्यांकाव्ययोराजानेषुद
क्षस्तिरश्चीन:परमेष्ठी प्रजापतिर्भाववृत्तंतृचमारोदसींजगतीं विश्वा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्रउक्थेभिर्वृत्रहंतमावसिष्ठउपनः सुहोत्रोवैश्वदेवीं ब्रह्माणिमेग
स्त्योद्धेइंद्रमरुत्संवादेतदिदाथर्वणोबृहद्दिवइमाउत्वाद्धेबृहत्या मेधा
तिथिरयर्ठंसहस्त्रंमेधातिथिःसतोबृहतीम् ॥ २२ ॥ आनस्त्रयोदशर्च्चः पु
रोरुग्गणः ॥ चतुर्ऋचंप्रतीकचोदितंचानोवायव्यांजमदग्निरिन्द्रवा
यूसुसन्दृशैन्द्रवायव्यांतापसऋधगित्थामैत्रावरुणीं जमदग्निरायात
माश्विनींवासिष्ठः प्रैतुवैश्वदेवींकण्वश्चन्द्रमाअप्स्वैन्द्रीमाहुतीपरिणा
मवादिनींत्रितआप्त्योदेवंदेवंवोमनुर्वैवस्वतोवैश्वदेवींदिविपृष्ठोमृधए
न्द्रइन्द्राग्नीअपात्सुहोत्रोदेवासोहिमनुरपान्धमद्धेनृमेधोस्येन्मेधाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थिर्दशम्येकादश्यंत्याचसतोबृहत्यः शेषाबृहत्यःशेषाबृहत्यः॥ २३ ॥
इति सर्वानुक्रमणीयंतृतीयोऽध्यायः ॥ ३ ॥ यज्जाग्रतःषड्चंमानसंत्रै
ष्टुभरंशिवसंकल्पः ॥ पितुन्नूषिणहमगस्त्योन्नस्तुतिमान्विच्चतुर्ऋच
मानुष्टुभं द्वयोरनुमितिर्द्वयोः सिनीवालीसरस्वत्यौ सिनीवालीपृथु
ष्टुकेद्वेगृत्समदस्त्वमग्नेद्वे आग्नेय्यौजगत्यौहिरण्यस्तूपआंगिरसउ
त्तानायांद्वेदेवश्रवादेववातश्चभारतावाद्यात्रिष्टुब्द्वितीयानुष्टुप्प्रमनम
हेनोधाद्व्यृचमैन्द्रंत्रैष्टुभमिच्छन्तित्वाद्व्यृचमैन्द्रंत्रैष्टुभमेवदेवश्रवादे
वताश्च भारतौ ॥ १ ॥ अषाढंयुत्सुगोतमः ॥ चतुर्ऋचंत्रैष्टुभंसौम्य

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मष्टोव्यरुव्यच्चतुर्ऋचंत्रैष्टुभर्ठसावित्रमांगिरसोहिरण्यस्तूपो द्वितीयाज
गत्युभापिबतुमाश्विनंतृचमुभापिबतं प्रस्कण्वोगायत्रीमप्नस्वतीमश्वि
नात्रिष्टुभौ कुत्सआरात्रिपथ्याबृहतीठंरात्रिदेवत्यां कशिपाभरद्वाज
दुहितोषस्तदुषस्यांपरोष्णिहंगोतमः प्रातरग्निंवासिष्ठःसप्तर्चमाद्याज
गतीबहुदेवत्यापञ्चभगदेवत्यास्त्रिष्टुभोंत्योषस्याः ॥ २ ॥ पूषन्तवसु
होत्रः ॥ पथस्पथःपरिपातिमृजिश्वैतपौष्ट्यौगायत्रीत्रिष्टुभौत्रीणिपदा
वैष्णव्योगायत्र्यौमेधातिथिर्घृतवती भुवनानांभरद्वाजोद्यावापृथिव्यां
जगतीयेनोलिंगोक्तदेवतांत्रिष्टुभंविहव्यआनासत्याहिरण्यस्तूपआ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्विनीमेषवोमारुतींत्रिष्टुभमगस्त्यःसहस्तोमाऋषिसृष्टिप्रतिपादिकां
त्रिष्टुभंयज्ञःप्राजापत्यआयुष्यंवर्च्चस्यंतृचंदक्षउष्णिक्शक्करीत्रिष्टुभो
हिरण्यस्तुतिरुतनऋत्विजोबहुदेवत्यात्रिष्टुभमिमांगिरःकूर्मोगात्सम
दआदित्यदेवत्यांत्रिष्टुभठंसप्तऋषयोध्यात्मवादिनीजगत्युत्तिष्ठंतृ
चोब्राह्मणस्पत्यआद्येबृहत्यौ कण्वोघोरोंत्यांत्रिष्टुभंगृत्समदोयइमा
चतुर्ऋचंप्रतीकोक्तम् ॥ ३ ॥ अपेतोध्यायः ॥ पित्र्यआदित्यस्यदेवा
नांवाद्यागायत्रीपरंयजुःसवितातेगायत्रीवायुःपुनातुचत्वारिलिंगोक्ता
नि ॥ सवितातेगायत्रीपरंमृत्योसंकसुकस्त्रिष्टुभंमृत्युदेवत्याठंशवातो

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स.नु. ऽनुष्टुब्बृहत्यौ वैश्वदेव्यावस्मन्वतीसुचीकस्त्रिष्टुभंवैश्वदेवीमपाघंलिंगो
॥६४॥ क्तदेवतामनुष्टुभᳫंशुनःशेपोदुःष्वप्ननाशनीमनड्वाहमानडुह्यनुष्टुबिमं
जीवेभ्यःसंकसुकोमृत्युदेवत्यां त्रिष्टुभमायुष्मानग्नआग्नेयींत्रिष्टुभंवै
खानसःपरीमेनुष्टुभमैंद्रींभारद्वाजःशिरिंबिठःक्रव्यादमाग्निंत्रिष्टुभंमाने
र्षींदमनोवहवपांजातवेदसींत्रिष्टुप्स्योनापृथिवीमेधातिथिःपार्थिवींगा
यत्रीमस्मात्त्वमाग्नेयीगायत्र्यानिरुक्ता ॥४॥ ऋचंवाचंपंचाध्यायींदध्य
सू.अ. ङाथर्वणोदद्दर्शाग्निकाश्वमेधिकवर्ज्जमाद्योध्यायः ॥ शांत्यर्थोवैश्वदेव
४ आद्यानियजूᳫंषियन्मेबार्हस्पत्यापंक्तिःक्रयात्वमैंद्र्यनिरुक्तागायत्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रोविश्वस्यविराड्द्विपदाशन्नोद्वे अनुष्टुभावहानिद्विपदागायत्रीशन्नइ
न्द्राग्नीत्रिष्टुब्गायत्र्यावंत्याशीर्द्यौः शांतिर्यजूंषिनमस्तेअस्त्वनुष्टुभौ
तच्चक्षुःपुरउष्णिक्सौरी ॥ ५ ॥ आददेनारिरस्याग्निर्दैवतम् ॥ दे
वीद्यावापृथिव्यं देव्योवम्र्योवल्मीकवपेयत्यग्नेवराहविहतमिंद्रस्यौज
आदाराः प्रैतुमखस्याश्वस्यर्ज्जवेयमायदेवस्त्वार्चिरसि घर्मदेवत्या
नियोघर्मसआदित्योय एषतपत्यनाधृष्टापुरस्तात्समपार्थिवानियज
मानाशीर्मधुप्राणदेवत्यानि गर्भोदेवानामवकाशामा माहिंसीरि
त्येतदंताघर्मदेवत्याधर्तादिवऊर्ध्वंबृहत्यपश्यंगोपांत्रिष्टुभं दीर्घतमा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदेत्वापरोष्णिकत्वष्टेमन्तःपत्न्याशीरहःकेतुनायजुषीघर्मदेवत्ये ॥
॥ ६ ॥ आददेदित्यैरज्जुः ॥ इडएहिगौर्यस्तेत्रिष्टुभंदीर्घतमाइन्द्रा
श्विनावैश्वदेवानिसमुद्रायत्वावातनामानिस्वाहाघर्मायघर्मदेवत्येवि
श्वाआशाआश्विन्यनुष्टुब्द्विविधाघर्मदेवत्यमाश्विनाघर्ममुष्णिगपातां
ककुबमेन्द्रयस्मेस्वरः स्वाहापूष्णेसप्तलिंगोक्तदेवतानिस्वाहासंपयादेव
त्यंमधुहुतंघर्म्मोंभीमंगायत्री बृहत्यावनवसानेअतिशक्करी वाग्नेयीस
मस्तात्र्यवसानायातेघर्मक्षत्रस्य बृहतीचतुःस्त्राक्तिर्महाबृहतीर्घमैतद
नुष्टुबाचिक्रदत्परोष्णिग्यावती द्यावापृथिवीदधिघर्मोंमयित्यत्पंक्तिर्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जमानाशीः पयसोरेतोगायत्र्यनवासानात्विषः संवृग्दधिघर्मोनुक्तंघ
र्मदैवतम् ॥ ७॥ स्वाहाप्राणेभ्योमांत्रवर्णिक्योदेवताः ॥ मनसः काम
मनुष्टुब्यजमानाशीः श्रीर्दैवताप्रजापतिःसंभ्रियमाणोयथाकालं प्राय
श्चित्तदेवताः सविताप्रथमेहन्प्रत्यहंक्रमेणोग्रश्चमारुतीगायत्रीविमुखा
व्योमन्त्रोग्नौविनियुक्तस्तस्मादाग्निकऽएवास्यऋषिः परमेष्ठीप्राजा
पत्योवाग्निर्ठंहृदयेनाश्वमेधिकानि त्रीणितन्त्रोक्तएव ऋषिर्लोमभ्यः
स्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिंशत् ॥ ८ ॥ ईशावास्य
मात्मदेवत्यआनुष्टुभोध्यायः ॥ अनेजदेकंत्रिष्टुप्सपरिजगतीवायु

...Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स.नु. रनिलंयजुषी ॐ ३ मितिपरमाक्षरस्य योगिनामालम्बभूतस्यपरस्यब्र
॥६६॥ ह्मणः प्रणवाख्यस्यास्थूलादिगुणयुक्तस्यब्रह्मऋषिच्छंदोगायत्रंपरमा
त्मादेवताब्रह्मारंभेविरामेचयागहोमादिषु शांतिपुष्टिकर्मसुचान्येष्व
पिकाम्यनैमित्तिकादिषुसर्वेषुविनियोगोस्यक्रतोत्रिभिर्यजुर्भिरंते य
ज्ञान्योगी स्मारयत्ययननयान्तनमस्कारोक्तिर्हिरण्मयेनादित्योपास
नमो ३ मितिनामनिर्देशोब्रह्मणःखंब्रह्मेत्याकाशरूपमन्तेब्रह्मध्यायेत्
सू.अ. ॥१॥ अथातश्छन्दोदेवता ॥ गायत्र्याअग्निरुष्णिहःसवितानुष्टुभःसो
४ मोबृहत्याबृहस्पतिः पंक्तेर्वरुणस्त्रिष्टुभइन्द्रोजगत्याविश्वेदेवा विराजो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्रःस्वराजोमित्रः स्वराजोरुणोतिच्छन्दसः प्रजापतिर्विच्छन्दसो
वायुर्द्विपदायाः पुरुषएकपदायाब्रह्मासर्वाऋचआग्नेय्यः ससर्वाणिय
जूंषिवायव्यानिसर्वाणिसामानिसौराणिसर्वाणि ब्राह्मणानिच स्वा
हाकारस्याग्निर्वषट्कारस्यविश्वेदेवाः कर्मारंभेमंत्राणांदेवतावेदितव्याः
संन्यस्यमनसिदेवतांततोहविर्हूयतेदेवतामविज्ञाययोजुहोतिदेवास्त
स्यहविर्नजुषन्तेस्वाध्यायमपियोधीतेमंत्रदेवतज्ञः सोमुष्मिँल्लोकेदेवै
रपीड्यतेतस्माच्चदेवतावेद्यामंत्रेमंत्रे प्रयत्नतोमंत्राणांदेवताज्ञानान्मं
त्रार्थमधिगच्छतिमंत्रार्थज्ञानात्तु विधूतपाप्मानाकमभ्येतिनहिकश्चि

Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दविज्ञाययाथातथ्येनदेवताः श्रौतानां कर्मणां विप्रःस्मार्तानां चाऽनु
तेफलम् ॥१०॥ अनादिष्टमध्वरादौ ॥ सर्वांतकर्मणिपरिभाषितंमन्त्र
गणंवक्ष्यामः ॥ सर्वमाग्नेयंगायत्रंगौतमीयꣳसर्वꣳसावित्रमौष्णिहंभा
रद्वाजीयꣳसर्वꣳसौम्यमानुष्टुभमाथर्वणिकꣳसर्वं बार्हस्पत्यंबार्हतमां
गिरसꣳ सर्ववारुणंपांक्तमालंबायनीयꣳ सर्वमैंद्रंत्रैष्टुभंयाज्ञवल्कीय ꣳ
सर्वमादित्यदैवतंजागतंकौत्सम् ॥ ११ ॥ ज्योतिष्टोमेदीक्षाप्रभृति ॥
वक्ष्यामोदीक्षायां भृगुरग्नाविष्णुगायत्री प्रायणीयआंगिरसोदितिरु
ष्णिकत्रयोविश्वामित्रः सोमोनुष्टुबातिथ्येवसिष्ठोविष्णुर्बृहतीप्रवर्ग्ये क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्यपआदित्यपंक्तिरुपसत्स्वात्रेयउपसद्देवतात्रिष्टुबग्नीषोमीयेगस्त्यो
ग्नीषोमौजगतीप्रायणीयेतिरात्रआग्निवेश्योह्नोरात्रेअतिजगतीचतुर्वि
ंशत्यहेसौकरायणः संवत्सरः शक्कर्यभिप्लवेषडहेसौपर्णार्द्धमासामा
साश्वातिशक्करीपृष्ठ्येषडहेसायकायनऋतवोष्टिरभिजिति प्रियघृतो
ग्निरत्यष्टिः स्वरसामसुसरस्वत्यापोधृतिर्विषुवति रौहिणायनआदि
त्योतिधृतिर्विश्वजितिसौभरइंद्रःकृतिर्गौआयुषोबाष्कलिर्मित्रावरुणौ
प्रकृतिर्दशरात्रआचार्यौ विश्वेदेवाआकृतिर्द्वादशरात्रिकेपृष्ठ्ये षडहे
भाल्लवेयोदिशोविकृतिश्छन्दोमेषुशौल्वायनइमेलोकाःसंकृतिर्दशमे
हनिपराशरसंवत्सरोभिकृतिर्महाव्रतेशैलिनः प्रजापतिरुत्कृतिरुदय

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीयेतिरात्रेभौवायनोवायुश्छन्दांꣳसिसर्वाणि ॥ १२ ॥ ऋषिभिरुप
लक्षितंवाक्यम् ॥ ऋषयश्छंदोभिरुपलक्षितादेवतामंत्रवर्णादृग्यजुष
योर्विनियोगतश्चविज्ञेयाः ॥ सर्वमेतच्छन्दोदैवतमार्षंचविज्ञाययत्कि
ञ्चिज्जपहोमादिकरोतितस्यफलमश्नुते ब्रह्मयज्ञारंभेयथाविधिस्नात्वा
छन्दःपुरुषमेनोनिर्णोदनꣳशरीरं न्यसेत्तिर्य्यग्बिलश्चमसऊर्ध्वबुध्नस्त
स्याक्षिणीगोतमभरद्वाजौ श्रोत्रेविश्वामित्रजमदग्नी नासिकेवसिष्ठ
कश्यपौ वागत्रिर्गायत्रींछंदोग्निर्दैवतांꣳशिरसिविन्यसेदेवमेवोष्णिहꣳ
सवितारं ग्रीवास्वनुकेबृहतीं बृहस्पतिंबाह्वोर्बृहद्रथन्तरे द्यावापृथिवी
मध्येत्रिष्टुभमिन्द्रꣳश्रोण्योर्जगतीमादित्यं मेढ्रेतिच्छंदसंप्रजापतिपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यौयज्ञायज्ञियंवैश्वानरमूर्वौरनुष्टुभंविश्वान्देवानष्ठीवतोः पंक्तिमरुतः
पादयोर्द्विपदांविष्णुं प्राणेषुविच्छंदसंवायुन्यूनातिरिक्तेष्वङ्गेषुन्यूनाक्ष
रंछंदआपोदेवतेत्येवर्ठंसर्वांगेषुयोजयित्वावेदमयः संपद्यतेशापानुग्र
हसमर्थोभवतिब्राह्मंतेजश्चवर्द्धतेनकुताश्चिद्भयंविन्दतऋङ्मयोयजुर्मयः
साममयस्तेजोमयो ब्रह्ममयोमृतमयः संभूयब्रह्मैवाभ्येतितस्मादे
तन्नाब्रह्मचारिणेनातपस्विनेनासंवत्सरोषितायनाप्रवक्त्रेनुब्रूयादेनेना
धीतेनचांद्रायणाब्दफलमवाप्नोत्यनेनचसम्यग्ज्ञानेनब्रह्मणःसायुज्य
ठंसलोकतामाप्नोत्याप्नोति ॥ १३ ॥ इतिसर्वानुक्रमणीयेचतुर्थोऽध्या
यः ॥ ४ ॥ ॥ अथच्छंदार्ठंसिगायत्र्युष्णिगनुष्टुब्बृहतीपंक्तित्रिष्टुब्ज

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गत्यातिजगतीशक्कर्यतिशक्कर्यष्ट्यत्यष्टिधृत्यतिधृतयःकृतिप्रकृत्याकृ
तिविकृतिसंकृत्यभिकृत्युत्कृतयश्चतुर्विंशत्यक्षरादीनिचतुरुत्तराण्यू
नाधिकेनैकेननिचृद्भुरिजौ द्वाभ्यांविराट्स्वराजौ पादपूरणार्थंतु क्षप्रसं
योगैकाक्षरीभावान्व्यूहेदाद्येतुसप्तवर्गेपादविशेषात्संज्ञाविशेषास्तान
नुक्रामंत एवोदाहरिष्यामो विराड्रूपाविराट्स्थानाश्चबहूनामपित्रि
ष्टुभ एवेत्युद्देशस्तत्रदशैकादशद्वादशाक्षराणांवैराजत्रैष्टुभजागताइति
संज्ञाअनादेशेष्टाक्षराः पादाश्चतुष्पदाश्चर्चः ॥ १ ॥ प्रथमं छन्दस्त्रिप
दागायत्री ॥ पंचकाश्चत्वारःषट्कश्चैकश्चतुर्थश्चतुष्कोवापदपंक्तिःषट्सप्तै
कादशा उष्णिग्गर्भास्त्रयः सप्तकाः पादनिचृन्मध्यमः षट्कश्चेदतिनिचृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्दशकश्चेद्यवमध्या यस्यास्तुषट्सप्तकाष्टकाः सावर्द्धमाना विपरीता
प्रतिष्ठा द्वौषटौसप्तकश्चेतिह्रसीयसी ॥ २ ॥ द्वितीयमुष्णिक्त्रिप
दांत्योद्वादशकआद्यश्चेत्पुरउष्णिङ्मध्यमश्चेत्ककुप् त्रैष्टुभजागतचतु
ष्काःककुम्न्यंकुशिरैकादाशेनोः परः षट्कस्तनुशिरामध्येचेत्पिपीलिक
मध्याद्यःपंचकस्त्रयोष्टकाअनुष्टुब्गर्भाचतुःसप्तकोष्णिगेव ॥३॥ तृती
यमनुष्टुप्चतुष्पदाथपंचपंचकाः षट्कश्चैकोमहापदपंक्तिर्जागतावष्टक
श्चकृतिर्मध्येचेद्दष्टकः पिपीलिकमध्यानवकयोर्मध्येजागतःकाविराण्न
ववैराजत्रयोदशैर्नष्टरूपादेकास्त्रयोविराडेकादशकावा ॥ ४ ॥ चतुर्थं
बृहती तृतीयोद्वादशकआद्यश्चेत्पुरस्ताद्बृहतीद्वितीयश्चेन्न्यंकुसारिण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोबृहतीस्कंधोग्रीवींवांत्यश्चेदुपरिष्टाद्बृहत्याष्टिनोर्मध्येदशकौविष्टार
बृहतीत्रिजागतोर्द्ध्वबृहती त्रयोदशिनोर्मध्येष्टकःपिपीलिकमध्यानव
काष्टकैकादशाष्टिनोविषमपदाचतुर्नवकाबृहत्येव ॥ ५ ॥ पंचमंपंक्तिः
पंचपदाऽथचतुष्पदाविराट्दशकाअयुजौजागतौसतोबृहतीयुजौचेद्वि
परीताद्यौचेत्प्रस्तारपंक्तिरंत्यौचेदास्तारपंक्तिराद्यांत्यौचेत्संस्तारप
ङ्क्तिर्मध्यमौचेद्विष्टारपंक्तिः ॥ ६ ॥ षष्ठंत्रिष्टुप्त्रैष्टुभपदाद्वौतुजाग
तौयस्याःसाजागतेजगतीत्रैष्टुभेत्रिष्टुब्वैराजौजागतौचाऽभिसारिणी
नवकौवैराजस्त्रिष्टुभश्चद्वौवावैराजौनवकस्त्रैष्टुभश्चविराट्स्थानैकादशि
नस्त्रयोष्टकश्चविराट्रूपाद्वादशिनस्त्रयोष्टकश्चज्योतिष्मतीयतोष्टकस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तोज्योतिश्चत्वारोष्टकाजागतश्चमहाबृहतीमध्येजागतश्चेद्यवमध्याद्यौ-
दशकावष्टकास्त्रयःपंकत्युत्तराविराट्पूर्वावा ॥७॥ सप्तमजगतीजागतप-
दाष्टिनस्त्रयः स्वौचद्यौमहासतोबृहत्यष्टकौसप्तकःषट्कोदशकोनवक-
श्चषडष्टकावामहापंक्तिर्माध्यंदिनीयेवाजसनेयके सर्वानुक्रमणिकैषा-
कृतिर्भगवतः कात्यायनस्यैषाकृतिर्भगवतः कात्यायनस्य ॥ ८ ॥

इति सर्वानुक्रमणिकायां पंचमोऽध्यायः ॥ ५ ॥ कंडिकासंख्या ॥ १२४ ॥

इदं पुस्तकं क्षेमराज-श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालये मुद्रयित्वा प्रकाशितम्

संवत् २०४८ शके १९१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

३५-८००

इति शुक्लयजुर्वेदमाध्यंदिनीयसंहितासमाप्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu